
भाद्रपदमासः
वर्षम् – ६९
एकादशोऽङ्कः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ सितम्बर २०१९

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



गणेशपूजनं भाद्रे दुर्गापूजा तथाऽऽश्विने।
उत्सवप्रियता देशस्याऽस्य सर्वत्र विश्रुता।।

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | विनायकसहस्रसिद्धे | राजेन्द्र मोहन शर्मा | ६ |
| ५ | श्रीकृष्णस्य भगवत्स्वरूपम् | साँवरमल शास्त्री | ७ |
| ६ | सुरभारतीसमुपासकाः | दीपककुमार चौधरी | ८ |
| ७ | विनावर्णनम् | प्रो. कमलेशकुमार छ. चोकसी | ९ |
| ८ | वेदेषु पर्यावरणम् | श्रीकार्तिकभाई जानी वेदगुरुजी | ११ |
| ९ | देवर्षिवर्यविवृतयः | डॉ. शिवदत्तशर्मा चतुर्वेदी | १३ |
| १० | स्वतन्त्रभारतस्य परतन्त्रमानसिकता | कविपंकजशास्त्री | १५ |
| ११ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | १६ |
| १२ | वास्तविकं स्वातन्त्र्यम् | दीपककुमारचौधरी ( दीपकवात्स्यः ) | १७ |
| १३ | अधिगतयशसो गौड़वंशावतंसाः | प्रो. ताराशंकरशर्मा पाण्डेयः | १८ |
| १४ | ज्योतिश्शास्त्रेण सह वास्तुशास्त्रस्य सम्बन्धः | मुकेश कौशिक | १९ |
| १५ | संस्कृत समाचारः | प्रधानसम्पादकः | २० |
| १६ | श्रीअजमल-भक्ति-गाथा ( काव्यम् ) | आचार्य पं. नथमलशास्त्री दाधीचः | २१ |
| १७ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २४ |
| १८ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २५ |
| १९ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २६ |
| २० | भारतभूम्याः विभूतयः | अविनाश शर्मा | २७ |
| २१ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| २२ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः



**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्व. स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

राजीव दाधीच
व्यवस्थापक

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

भाद्रे मास्यसिते दले घनघटाव्याप्ते नभोमण्डले,
देवक्यां वसुदेवतो जनिमितः कंसस्य कारागृहे।
नीत्वा यं वसुदेव एव तनयं मत्वा गतो गोकुले,
तं वन्दे जगतो गुरुं नटवरं मायामनुष्यं हरिम्।।

## मासावतरणम्

अम्भोदा बहवो वसन्ति गगने सम्पूरिता वारिणा,
नित्यं वृष्टिभिरार्द्रयन्ति वसुधां यच्छन्ति संजीवनम्।
बालाः स्नान्ति तदा जले सुविमले नृत्यन्ति गायन्ति च,
आशाभिः भरिताः स्त्रियश्च गगनं पश्यन्ति उत्कण्ठया।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

भाद्रपदमासः
वर्षम् 69
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2076
सितम्बर, 2019
अङ्कः -11
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# उद्धरेदात्मनात्मानम्

...✍ पं. प्यारेमोहनशर्मा

जीवने वैविध्यं विषमता च विद्येते। साफल्य-मसाफल्यं च विद्यते। नेतृत्वम् अनुसरणञ्च लक्ष्यं लक्ष्यहीनता च! तासु परिस्थितिषु सकुशलं निवर्तनस्या-मोघमस्त्रं विद्यते आत्मविश्वासः। जीवने साफल्यं केवले-नात्मविश्वासेन लभ्यते।

व्यक्तिः नैकान् निर्णयान् विदधाति। नैकशो योजना-बद्धा निर्णया विधीयन्ते नैकशः सहसा। नैकशः आश्वस्तो भूत्वा नैकशश्च सन्देहेन। नैके निर्णया प्रभावहीना जायन्ते। नैके च हानिकारका भवन्ति। संस्थासु यत्र सहस्रशो जनाः कार्यं कुर्वन्ति तत्रानेके निर्णयाः सर्वेभ्यः कष्टप्रदाः जायन्ते। परन्तु निर्णयास्तु विधीयन्ते एव श्रेष्ठनिर्णयेभ्यो न केवलमात्मविश्वास अपितु आस्थापि भवेत्। स्वकार्ये आस्था स्वकीयसंस्थायां परिवारे चास्था अर्थात् स्वस्मिन्नास्था। आत्मविश्वासः आस्था च स्फूर्तिं प्रयच्छति। नीतिषु आस्था एव सामाजिक-चिन्तनमार्गं प्रशस्तं विदधाति। तदैव व्यक्तिः संस्था वा समाजाय किञ्चित् दातुं प्रभवो भवन्ति। तेषां निर्णया अपि श्रेष्ठा भवन्ति। सहचराः कार्यकर्तारश्चापि तस्य आस्थायाः सम्मानं कुर्वन्ति। आत्मविश्वासः स्पष्टतया प्राप्यते। श्रेष्ठभावना समागच्छति। नेतृत्वस्य तु प्रथमा आवश्यकता विद्यते आस्था आत्मविश्वासश्च। यदि परिवारे अथवा संस्थाने अस्मकमास्था नास्ति तर्हि अन्यैः सहकर्मिभिः तस्या अपेक्षा कथं कर्तुं शक्यते? नैकशोऽभ्यासेनात्मविश्वासस्य आस्थायाश्च संरचना विधीयते। प्रारंभिकी परिवारी-शिक्षात्र कार्यं करोति। पुनरपि जीवनस्य लक्ष्यं कार्येण सह संयुक्तं भवेत् तदा आत्मविश्वासो जागर्ति कार्ये आस्था जायते। आस्थामार्गः समर्पणमार्गो विद्यते। विनम्रताया मार्गोऽयम्। आस्थया सहकर्मिणोऽपि प्रभाविता जायन्ते। मनसि विश्वाससमर्पणसदृशा भावा यदा जाग्रति तदा मतेः दिशापि परिवर्तते। मिथ्या विचारा स्वतः विलुम्पन्ति। कठिन-समयेऽस्या परीक्षणं भवति। प्रत्येकं जनः संस्था चानेन परीक्षणकालेन परीक्ष्यते। जीवने प्राकृतिकी आपदा अपि आगच्छन्ति। संयोगवियोगौ च जायेते। अस्यां स्थितौ आस्थावान् विचलितो न जायते। तस्य निर्णयाः पूर्णरूपेणात्मविश्वासयुक्ता भवन्ति। संस्थाने हड़तालसमये आत्मविश्वासेन कार्य-संचालनं परीक्षाकालो भवति।

आत्मविश्वासस्य शत्रुर्वर्तते भयम्। तच्च वास्तविकं काल्पनिकञ्च भवितुं शक्नोति भयेन व्यक्तिः शक्तिहीनता-मनुभवति। परिणामतः शरीरं निष्क्रियं संजायते। समर्पणभावः भयमुक्तेः एक उपायो विद्यते। अज्ञानकारणेन बुद्धिपूर्वकं कृतेनापराधेन भयं जायते। अस्माकं मनसि आत्मविश्वासः स्थिरः सुदृढश्च स्यादेतदर्थं सत्साहित्यं पठितव्यम्। गीतायां भगवता कृष्णेनोक्तम् -

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।**
**आत्मैवात्मनो बन्धुरात्मैव रिपुरात्मनः।।**

# भारतीया संस्कृतिः

करुणावारिधिः सकलजनरंजनः कौशल्यानन्दवर्धनः दशरथनन्दनः मर्यादापुरुषोत्तमः श्रीरामः पितुराज्ञां पालयितुं यदा स्वमातुराज्ञां प्राप्य वनं गन्तुं समुद्यतोऽभवत् तदा निखिलसौन्दर्याधिष्ठात्र्याः परमसौकुमार्यायाः सीतायाः प्रेमाग्रहं स्वीकुर्वन् तां काननयात्रायाः सहगामिनीं कृत्वा अनन्यसेवाव्रतिनं सुमित्रानन्दसंवर्धकं भ्रातरं लक्ष्मणमपि अनुगन्तुं स्वीकृतिं प्रायच्छत्। ततः चतुर्दशवर्षात्मकं वनवासं वरे याचिकां मातरं कैकेयीं सम्मानयन् तस्याश्चरण-वन्दनं चकार। वनं गन्तुमाज्ञामायाचत। कठोरतामूर्तिः कैकेयी रामसीतालक्ष्मणेभ्यो धारणाय वल्कलवस्त्राणि प्रायच्छत्। रामः सद्यः तानि अधारयत्। लक्ष्मणोऽपि राममनुचकार तेनापि वल्कलवस्त्राणि धारितानि। कैकेय्याः प्रदत्तानि युगलवल्कल-वस्त्राणि सुकोमलहस्ताभ्यां गृह्णती भावप्रवणा सौन्दर्याधिष्ठात्री सुकुमारस्वभावा मैथिली शोकसागरे न्यमज्जत।

मर्यादापुरुषोत्तमस्य रामस्य प्राणप्रिया प्रियतमा अनेन कारणेन दुःखिता नाभवत् यदधुना कौशेयवस्त्राणि त्यक्ष्यति

अपि कथं परिधापनीयानि वल्कलवस्त्राणि सा न जानातिस्म। यथा पुरुषा धारयन्ति तथा सा धारयितुं न शक्नोति। हा हन्त कथमिमानि वस्त्राणि धारयामि? अस्मिन्नूहापोहे तस्याश्चक्षुभ्यामश्रूणि निरगच्छन्। सा इतस्तोऽपश्यत्। सा स्वप्रियतमं वल्कलवस्त्रधारिणं परमप्रेमास्यदं रामं शनैरपृच्छत् हे स्वामिन्? वनवासिनो मुनयः वल्कलवस्त्राणि कथं धारयन्ति? ''कथं नु चीरं बध्नन्ति मुनयो वनवासिनः?'' वल्कलवस्त्रधारण-प्रक्रियाया ज्ञानाभावेन सा लज्जिता जाता। एकं वल्कलवस्त्रं कण्ठे धारयित्वा अपरं हस्ते नीत्वा सा किमपि नावदत्। यथा छान्दोग्योपनिषदि-

**कृत्वा कण्ठे स्म सा चीरमेकमादाय पाणिना,**
**तस्थौ ह्यकुशला तत्र व्रीडिता जनकात्मजा।।**

तदा सीताया स्थितिं परिज्ञाय रामः तस्या समीपमागच्छत् स्वहस्ताभ्यां कौशेयवस्त्रोपरि वल्कल-वस्त्राणि पर्यधापयत्-

**तस्यास्तत् क्षिप्रमागत्य रामो धर्मभृतां वरः।**
**चीरं बबन्ध सीताया कौशेयस्योपरि स्वयम्।।**

सम्पूर्णविश्वसंस्कृतौ सभ्यतायामेतादृक् दर्शनं दुर्लभम्। सीतारामयोः एतादृशं करुणप्रसङ्गं दृष्ट्वा अन्तः पुरस्य सर्वाः स्त्रियः करुणक्रन्दनमकुर्वन्। ''मुमुचुर्वारि नेत्रजम्'' दशरथस्य पुत्रवधूं श्रीरामस्य प्राणप्रियतमां प्राणवल्लभां वल्कलवसनां दृष्ट्वा वशिष्ठोऽपि धैर्यमत्यजत्। सोऽपि ''मुमचुर्वारि नेत्रजम्'' तस्मिन् समये वशिष्ठः कथयति-

**अथ यास्यति वैदेही वनं रामेण संगता।**
**वयमत्रानुयास्यामः पुरं चेदं गमिष्यति।।**
**अन्तःपालाश्च यास्यन्ति सदारो यत्र राघवः।**
**सहोपजीव्यं राष्ट्रं च पुरं च सपरिच्छदम्।।**
**भरतश्च शत्रुघ्नश्च चीरवासा वनेचरः।**
**वने वसन्तं काकुत्स्थमनुवत्स्यामि पूर्वजम्।।**

एषा अथर्वण वाणी विद्यते। श्री वशिष्ठस्य वाणी विद्यते।

## शुभाशंसनम्

370 धारायाः समाप्तये भारतीपरिवारः प्रधानमन्त्रिणे धन्यवादान् ज्ञापयति। स्वतन्त्रताप्राप्तिसमये भारते सहस्रशो राज्यानि आसन् परन्तु लौहपुरुषेण तत्कालीनगृहमन्त्रिणा सरदारपटेलमहोदयेन सुदृढैः प्रयासैः सर्वाणि राज्यानि भारते विलीनानि कृतानि। परन्तु कश्मीरविषये प्रधानमन्त्रिणा पं. जवाहरलालमहोदयेन स्वयं निर्णयः कृतः। ते कश्मीरं पृथक् राज्यमजूघुषन्। 370 धारा संविधाने योजिता 35ए धारया विशेषाधिकारोऽपि प्रदत्तः। प्रियः शेख अब्दुल्ला महोदयः कश्मीरस्य प्रधानमन्त्रिपदे नियोजितः। अन्यैः मन्त्रिभिः कृतेऽपि विरोधे महोदयोऽयं स्वकीयेच्छया सर्वमिदं चकार। परिणामतः कश्मीरस्य पृथक् ध्वजोऽभवत्। तत्रत्या नागरिकतापि पृथक्रूपेण प्रदत्ता। कश्मीरवासिनः भारतस्य नागरिका एव नासन्। सप्तति-वर्षेभ्योऽयं क्रमः प्राचलत्। आतङ्कवादस्तत्र प्रफुल्लितः। नहि केनापि प्रधानमन्त्रिणा धारासमाप्तेः साहसः कृतः मुसलमाना रुष्टा भविष्यन्ति तेन महानुत्पातो भविष्यतीत्याशङ्कया नहि केनापि 370 धारा समाप्तिविषये विचारः कृतः।

परन्तु प्रधानमन्त्री नरेन्द्रमोदीमहोदयः साहसपूर्वकं हेलयैव 370 धारां समापिपत्। गृहमन्त्रिणा अमितशाहेन सुदृढमिच्छाशक्त्या संविधाने निहितनियमानुसारं पूर्वं राज्यसभायां समाप्तये प्रस्तावः कृतः तत्र प्रधानमन्त्रिणः साहसस्य प्रशंसा कृता। 351 मतैः (पूर्णबहुमतेन) प्रस्तावः स्वीकृतोऽभवत् ततश्च 371 मतैः लोकसभायां प्रस्तावः पारितोऽभवत्। राष्ट्रपतेः हस्ताक्षराणि जातानि। अधुना स्वतन्त्रभारते कश्मीरोऽपि भारतीयमेकं राज्यं संजातम्। विरोधिनः शङ्कन्तेस्म यत् 370 धारा समाप्तिसमकालमेव कश्मीरे महान् जनसंहारः उत्पातश्च भविष्यति परन्तु प्रधानमन्त्रिण गृहमन्त्रिणश्च सुदृढेन निर्णयेन तत्र न कोऽप्युपद्रवः संजातः। सर्वत्र शान्तिः वर्तते। अशान्ति-निर्मातारः उपद्रविणोऽन्ये चैतादृशा नेतारः पूर्वमेव निगडिताः। केचन स्वगृहेष्वेवान्ये च कारागृहे। दशसह-स्रसंख्याकाः भारतीयाः सैनिकास्तत्र पूर्वमेव नियोजिताः। अतः कश्मीरे पूर्वरूपेण शान्तिर्विद्यते।

भारतीपरिवारः 370 धारा समाप्तये प्रधानमन्त्रिणः स्वागतं करोति धन्यवादं च ज्ञापयति। अमितशाहाय गृहमन्त्रिणेऽपि धन्यवादं ज्ञापयति।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।**

( गताङ्कादग्रे )

# विनायकसहस्रसिद्धे

❑ पं. राजेन्द्रमोहनशर्मा

स मूषकम् अपृच्छत्-आम् तथास्तु परन्तु पंचामृतस्य पृथक् पृथगर्थं बोधयतु येनान्यदा तथा कर्तुं शक्नुमः। मूषको मौनमेवेतस्ततो दृष्ट्वा शीघ्रगत्यागच्छत् लक्षमवदत्आम् वदतु पंचामृते के सन्ति? पञ्चामृताः। लक्षः स्मित्वावदत् त्वं मदीयं ज्ञानं जिज्ञाससेऽथवा स्वकीयमज्ञानं शान्तं चिकीर्षसि। अहं तु विनायकसाहाय्यं चिकीर्षामि। अतो यदा भविष्यति-अस्माकमस्यातिथेः पुनः कदापिएतादृक् सत्कारसमये स अमृतस्य कस्याप्येकेन तत्वेन वंचितो न भवेत्। पंचामृतस्य समग्राणि वस्तूनि तदीयस्नानाय समाहृतानि स्युः। परिहासं कुर्वन् अकथयत् किं त्वं न पश्यसि पंचामृतस्नानानन्तरं विनायको गौरवर्णोऽभवत्।

मूषकस्तु परिहासे गौरवर्णमुल्लिलेख। परन्तु यथा यथा सूर्यरश्मिभिः सह सुगंधितः परिवेशः विनायकस्य परिक्रमा-मकरोत् विनायकस्य वर्णः स्वर्ण इवाभासत। श्वेताश्वे स्थितः एष पीतवर्णो बलशाली प्रलम्बो विशालकायः पुरुषः सम्पूर्णं काननमलैकिकयाभया पूरयतिस्म। स्वयं विनायकोऽपि सूर्येण सह दृष्टिपरिचर्चायां निमग्न आसीत् तदीयश्वेताश्वेन सह सूर्यस्य सप्ताश्वा अपि सादृश्यम् अमेलयन्। विनायकः धावमाने स्वकीयेऽश्वे सहसा पद्मासने समाधिस्थः संजातः। तदीयहस्तात् कशा परित्यक्ता जाता। स च प्रस्तरमूर्तिवत् ध्याने समाधौ च केन्द्रितः संजातः। मूषकलक्षगणेभ्यश्च नायं चमत्कारोऽविद्यत। ते अजानन् विनायकः कदापि प्राप्तेऽवसरे शीघ्रं समाधिस्थो जायते स्म। आश्चर्यकरं तु इदं जायतेस्म यत् यस्मिन्नश्वे विनायको यात्रां करोति स अश्वः स्वयमेवाश्वारोहिणः संकेतं निर्देशं च विद्युत्तरङ्गैः स्वयमेव गृह्णातिस्म। अतः कुत्र तेन स्थातव्यं कुत्र चोत्प्लनं विधातव्यं कुच चोन्नते स्थले संतुलनं विधाय संकुचितमार्गेण गन्तव्यं कुत्र च कस्यां नद्यां जलप्रवाहे वा स्वकीयपदमार्गनिर्माणं विधातव्यं सर्वमिदमश्वः स्वयं सारल्येन विदधातिस्म। मार्गानुसारमेव विनायकस्य समाधिर्जायतेस्म। विनायकं दृष्ट्वा नैकशो मूषकोऽसफलं प्रायतत्। परन्तु प्रत्येकवारं स निम्नः अश्वश्च तदुपरि जायतेस्म। विनायको मूषकं नैकशोऽवरोद्धुं प्रायतत् परन्तु स बारं बरमसफलं प्रायतत पतनानन्तरं बहूनि दिनानि यावत् स्वकीयहस्तौ पादौ च काननस्यौषधिभिः (बडीबूटी) लेपनमकारयत्।

विनायकस्य समाधिः यात्रासमूहस्य विवरणं च समानरूपेण लयबद्धोऽवर्तिष्ट। परन्तु वैशिष्ट्यमिदमासीत् यदस्य गणस्याग्रभागे पृष्ठभागे च ये उपनायकाः प्राचलन् ते आसन्नापदं सम्यक्तया अन्वभवन् येन तेषां मार्गोऽवरुद्धो भवितुं शक्नुयात्।

वनप्रान्तस्य विषभृतैः वृक्षैः हिंसकैः पशुभिश्च विषाक्तैः नागैश्च तत् भवितुं शक्नोतिस्म। अद्याप्यादिदलं पूर्ववदग्रे प्राचलत् सहसैव एकस्मात् विशालहिमवृक्षात् एको भुजङ्गो लम्बमानः सम्मुखे समागच्छत्।

सम्पूर्णयात्रासमूहं च यो यत्रास्थितस्तत्रैव स्थातुं विवशमकरोत्। प्रलम्बस्य भुजङ्गस्य आकृतिः शनैः शनैः अवर्धतअन्ते च वृक्षादधः भूमिमस्पृशत्। भुजङ्गः स्वकीय-मग्रभागं भूमावस्थापयत्। फणमुत्थाप्याश्चोपरि फूत्कारं चकार। लक्षश्चकितोऽभवत्। स अजानात् यदयं भुजङ्गः किमिति तेषां मार्गं रुणद्धि। नेतः पूर्वं विनायकस्य केनापि गणेनएतादृशो विशालो भुजङ्गः समवलोकितः।

भुजङ्गस्य नेत्रे अङ्गारका इव प्राज्वलन्। स वारं वारं स्वकीयजिह्वां वायौ प्राचालयत्। यथा यथा स वायौ स्वकीय-जिह्वामचालयत् तथा तथेत्थं प्रतीयतेस्म यथार्द्धचन्द्राकाराः क्षुरिका उत्प्लवन्ति। भुजङ्गस्य नेत्राभ्यां तीक्ष्णविषपूर्णो वायुः प्रसरतिस्म। लक्षो नित्यमिव भुजङ्गं प्राणमत् हस्तौ पिधाय विनम्रभावेनावदत् न वयं भवतां शत्रवः अस्मभ्यं मार्गं देहि। अस्माकं मार्गः अतीव प्रलम्बो विद्यते वयं भवता सह युद्धं न चिकीर्षामः। परन्तु प्रतीयतेस्म भुजङ्गस्य मनसि कश्चिदन्य एव भावो विद्यतेस्म। संभवतः एष मार्गः भुजङ्गानामेवाविद्यत। अतः स न वाञ्छतिस्म कोऽप्यन्यस्तेन पथा गच्छेदिति।

परन्तु स यदा लक्षस्य विनम्रनिवेदनं नाशृणोत् तदा-विवशो लक्षः स्वगदामुत्थापयत्। लक्षः पूर्णवेगेन गदां भुजङ्गशिरसि प्राक्षिपत् परन्तु कुशलनर्तक इव भुजङ्गो दिशां पर्यवर्तयत्। पुनः स तथैव प्रहारं चिकीर्षतिस्म। लक्षभुजङ्गयोर्मध्ये इदं युद्धं प्राचलदेव तस्मिन्नेव समय-आदिसमूहस्य पञ्चषूपनायकेष्वेको विनयो बहि-रागच्छत्। दृश्यमिदं दृष्ट्वा सः स्तब्धः संजातः। स-अवगच्छत् यद् वयं मार्गं विस्मृत्यान्येन मार्गेणाग्रेसरामः। विनयो लक्षं मूषकं चावदत्-अस्माभिः मार्गः परिवर्तनीयः। अस्य पर्वतस्य दक्षिणभागतो प्रलम्बमार्गेणास्माभिश्चलितव्यम् यदि वयमनेनैव मार्गेण चलिष्यामस्तर्हि मार्गे नैके भुजङ्गा अस्मानवरोत्स्यन्ति ते च क्षतिमप्यस्माकं विधातुं शक्नुवन्ति।

उच्चैः वार्तालापेन कोलाहलेन च विनायकस्य ध्यानभंगः संजातः। स सम्यगश्वे समुपविश्य सम्मुखे अकारणं मार्गावरोधकं भुजङ्गं दृष्ट्वा कुपितः संजातः। स कटिप्रदेशात् तत्क्षणमेव पाशमाचकर्ष भुजङ्गे पातितु-मुद्यतोऽभवदेवं तस्मिन्नेव क्षणे उपनायको विनयः सम्मुखे समागच्छत्। स अबोधयत् यदस्मिन्नागक्षेत्रे भुजङ्गसमूहात् शत्रुतास्मभ्यं क्षतिप्रदा भविष्यति। अद्यावधि ऋषयः सिद्धपुरुषाः चिकित्सकाश्च कोऽपि यात्रिसमूहश्च नानेन मार्गेण गन्तुं समर्थोऽभवत्।

**( प्राचार्य )**

**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

# श्रीकृष्णस्य भगवत्स्वरूपम्

❑ साँवरमल शास्त्री

**वसुदेवसुतं देवं, कंसचाणूरमर्दनम्।**
**देवकीपरमानन्दं, कृष्णं वन्दे जगद्गुरुम्।।**

भारतवर्षः पुण्यभूमिः वर्तते यत्र अन्यायात्याचारादीनि पापानि यदा वर्धन्ते तदा परमात्मा कस्मिन्नपि रूपे पृथिव्यामवतीर्य भूमेः पापभारं दूरीकरोति। अस्माकं शास्त्राणि ऋषयश्च मान्यतामिमां पोषयन्ति प्रमाणयन्ति च। यथा–

**''यदा यदा हि धर्मस्य, ग्लानिर्भवति भारत।**
**अभ्युत्थानम् धर्मस्य, तदात्मानं सृजाम्यहम्।।''**

महाकविना तुलसीदासेनाप्युक्तिरियं समर्थिता–

**जब जब होहि धरम की हानी**
**बाढहिं असुर अधम अभिमानी।**
**तब तब प्रभु धरि विविध शरीरा**
**हरहिं कृपानिधि सज्जन भववीरा।।**

परमात्मा रामकृष्णादिवत् ''नृसिंहादीनि'' बहूनि रूपाणि धृत्वा दानवान् अवधीत्। परमेश्वरः अंशावताररूपेण प्रताप-शिवाजी-गान्धी-पटेलादिरूपेषु पृथिव्यामवतीर्य मनुजान् पापाद् वारयति जनकल्याणाय योजयते च।

श्रीकृष्णः षोडशकलायुतः पूर्णब्रह्म परमात्मा आसीत् तथा च कृष्णरूपे देवक्याः कुक्षितः समुत्पन्न एकोऽवतार आसीत्। अस्यां श्रेण्यां केवलं लोकोत्तरपुरुषा एव परिगण्यन्ते। एतादृशेऽवतरितपुरुषे विद्यमानं वैशिष्ट्यं सामान्यपुरुषे नैव मिलति। अयं परमात्मा त्रेतायुगे रामरूपे तथा द्वापरे कृष्णरूपेऽवतीर्णो बभूव। त्रेतायुगे शेषः लक्ष्मणरूपेऽनुजो भ्राता समजनि तथा द्वारपरयुगे शेषोऽयं बलरामरूपेऽग्रजो भ्राता बभूव।

कंसस्य कारावासे प्रतिबन्धिता देवकी कृष्णं प्रसूय तत्कालमेव भर्तारं वसुदेवं विनिवेद्य यशोदायाः पार्श्वे प्रेषयामास। यदा वसुदेवो मुख्यद्वारमध्यमगमत्तदा द्वारपालाः निद्रानिमग्ना आसन् तथा च कपाटलग्नं तालकं स्वत एवोद्घाटितमभूत्। सर्वमिदं किमासीत्? तस्य लोकोत्तरस्य परंब्रह्मणो बालरूपस्य प्रभाव एव केवलमासीत्।

वसुदेवस्यानेकाः पत्न्य आसन् (भाग 9-24-45)

यथा–''**पौरवी रोहिणी भद्रा मदिरा लोचना इला।**
**देवकीप्रमुखा आसन् पत्न्य आनकदुन्दुभेः।।**''

बलरामो देवक्याः सप्तमः सूनुरासीत्। यदा सः गर्भस्थ आसीत् तदैवायं रोहिण्याः गर्भे सङ्क्रमितः। अत एव बलरामस्य नाम ''सङ्कर्षणः'' इत्यासीत्। बलरामो रोहिण्याः गर्भाद् उदपद्यत, अत एवायं ''रोहिणेयः'' इति नाम्ना परिज्ञायते। रामो बलरामश्चेति नामनी तस्यैवास्ताम्।

एकदा योगमाया कंसं व्याजहार– अरे कंस! तव कालः देवक्याः गर्भाद् उदपद्यत। वाचमिमामाकर्ण्य कुपितः कंसः खड्गमादाय देवकीं वसुदेवञ्च हन्तुं कारावासे प्राविशत्। तत्समये भयावहः कश्चिन्नागः तत्र प्राकटीत्। सः फणं विस्तार्य सावेगं फूत्कारं प्रारभत। फणिनः फूत्काराद् विषकणाः कंसस्य शरीरे न्यपतन्। तेषु विषकणेषु प्राणहरं दाहकं गरलमासीत्। विषकणैस्तस्य शरीरमदह्यत। कंसः प्राणान् त्रातुं त्वरितं तस्मात् कारावासात् स्वप्रासादं प्रति दुद्राव।

इतः बलरामः स्वशयनकक्षे निरन्तरं फूत्कारान् उत्सर्जन् नष्टसंज्ञो बभूव। अनेकैः व्यक्तिभिरुपचारितोऽपि चेतनां नालभत। फूत्काराः निरन्तरं चलायमाना आसन्। यशोदानन्दश्च द्वावेव व्याकुलावभूताम्। तत्समये तत्रोपस्थितैः जनैः कृष्णः समाहूतः, बलरामस्य पार्श्वे प्रेषितश्च। अन्तर्यामी कृष्णः स्वाग्रजं बलरामं न्यगादीत्– अयि भ्रातः! शान्तिं लभस्व। तव विषकणैः व्याकुलीभूय कंसस्तस्मात् स्थानात् पलायितः। पितरौ देवकीवसुदेवौ सुरक्षितौ स्तः। इत्याकर्ण्य बलरामश्चेतनामलभत।

''कृष्णं वन्दे जगद्गुरुम्'' अस्मिन् वाक्ये कृष्णः ''जगद्गुरुः'' इति शब्देनोद्घोषितः। तस्य प्रियशिष्यः पार्थो वर्तते। सोऽपि स्वगुरुं कृष्णं निवेदयति- ''शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।'' तस्मिन् समये पार्थस्यैक एव प्रश्न आसीत्- अहं युद्धे परिजनान्, मित्राणि, सम्बन्धिनः, मातुलं, गुरुं, पितामहं किमर्थं हनानि, कथं वा हन्याम्?

गुरुदेवः श्रीकृष्णः प्रियशिष्यायार्जुनाय दिव्यचक्षुषी प्रदाय, स्वस्य च विराड्रूपं दर्शयित्वा पार्थमबोधयत्- हे पार्थ! इदं मारणादिकं कार्यं ममाधीनं वर्तते। त्वां तु केवलं निमित्तमात्रं सम्पादयामि। स्वात्मानं प्रयोगशालां निर्माय प्रायोगिकरूपेण सैद्धान्तिकज्ञानस्यावबोधनं केवलं कृष्णसदृशो गुरुरेव कर्तुं शक्नोति। अत एव कृष्णः ''नास्ति तत्त्वं गुरोः परम्'' अस्याः सूक्तेः सजीवं निदर्शनं वर्तते। ईदृशो गुरुः ''न भूतो न भविष्यति'' इति सर्वथा सत्यमस्ति।

श्रीकृष्णस्य मुखाद् विनिःसृताया गीतायाः यावत्यः टीकाः सन्ति तावत्यः टीकाः कस्यापि ग्रन्थस्य न विद्यन्ते। अनेन ज्ञायते यत् श्रीकृष्णः कर्मयोगस्य, ज्ञानयोगस्य, भक्तियोगस्य च अनुपम उद्घोषक आसीत्। गीता अध्यात्मज्ञानस्य सर्वोत्कृष्टो ग्रन्थोऽस्ति तथा च भारतवर्षः अनेनैव ज्ञाने जगद्गुरोः पदवीं लब्धवान्। गीताशास्त्रं वेदानामुपनिषदाञ्च सारभूतं सार्वभौमं सत्यं वर्तते। त्रिभुवनपतिः श्रीकृष्णः स्वयं पार्थस्य रथस्य चालको भूत्वा कर्मयोगिनः श्रेष्ठतमां भूमिकां निरवाहयत्। श्रीकृष्णः ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन'' इति समुपदेश्य कर्मणो महत्त्वं प्रत्यपादयत् तथा च भक्तियोगेऽपि- ''न मे भक्तः प्रणश्यति''इत्युक्त्वा भक्तियोगस्य स्थानं सर्वोपरि व्यदधात्।

सर्वशक्तिमत्ता-सर्वव्यापकतादीनि षड् ऐश्वर्याणि यत्र भवन्ति स एव ''भगवान् इत्युच्यते।'' यदा दुर्योधनः दूतकार्यसम्पादकं कृष्णं बन्धयितुमैच्छत्तदा बहवः कृष्णाः समभवन्। किमिदं साधारणमानवस्य कार्यमसीत्? जयद्रथस्य छिन्नं मस्तकं योगमायाशक्त्या तत्पितुः वृद्धक्षत्रस्याङ्के निपातनं कृष्णस्याद्भुतं कार्यमासीत् अन्यथा पार्थस्य शिरसः सहस्रखण्डा अभविष्यन्। किं साधारणपुरुष ईदृक्षं कार्यं कर्तुं शक्नोति? अतः कृष्णस्य परमेश्वरत्वं स्वीकरणीयमेव।

अस्माकमृषीणामुक्तिरियं प्रसिद्धा- ''श्रीकृष्णः शरणं मम'' (शरणं गृहरक्षित्रोः) अर्थात् भगवान् कृष्ण एवास्माकं रक्षकोऽस्ति। इयं भारतधरा भगवता कृष्णेन गौरवान्विता वर्तते। ''रसो वै सः '' इत्यनेन रासलीलां कुर्वन्नपि स योगेश्वरो निगद्यते। अद्यापि विजयं सफलताञ्चाधिगन्तुं कृष्णार्जुनौ भूयास्ताम्। सत्यमेवोक्तम्-

**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।**
**तत्र श्रीः विजयो भूतिः ध्रुवा नीतिर्मतिर्मम।।**

**विजयच्छाया कालाडेरा ( जय राज. )**

# सुरभारतीसमुपासकाः

**❑ दीपककुमार चौधरी**

**अष्टाविंशतिकं राष्ट्रं भाति मामकभारतम्।**
**शिरसि राजते जम्मू नागानां मणयो यथा।।**
**अङ्गानीव पुनर्भान्ति वामे स्कन्धे हिमाचलः।**
**पञ्जाबं दक्षिणे स्कन्धे हरिवासश्च राजभूः।।**
**गुजरातं महाराष्ट्रं गोवा कर्नाटकं ततः।**
**केरलो दक्षिणे वामे चरणे तमिलं तथा।।**
**आन्ध्रं तेलाङ्गनाराज्यमुत्कलो बङ्गमेदिनी।**
**झारखण्डो बिहार च वामेऽसमोऽरुणाचलः।।**
**सिक्किमत्रिपुराराज्ये नागधरा मणीपुरम्।**
**असमात्मसप्तके सङ्घे मेघालयो मिजोरमः।।**
**हृद्भागे देहली मध्ये मध्योत्तरछत्तीसकाः।**
**अष्टाविंशतिकं राष्ट्रं भाति मामकभारतम्।।**
**''वात्स्यकोशः''**

**आचार्यद्वितीयवर्षम्**
**राष्ट्रियसंस्कृतसंस्थान, जयपुरपरिसरः**

# विनावर्णनम्

❑ प्रो. कमलेशकुमार छ. चोकसी

(संस्कृतभाषायाः अध्येतारः भाषायाः विशेषाध्ययन–नार्थं विविधान् वाक्यप्रयोगान् कुर्वन्ति। तत्र प्रतिवाक्यं कश्चित् नियमः प्रवर्तते इत्यपि ते विचारयन्ति। एतेनायासेन ते क्रमशः एकैकशः नियमान् जानन्तः संस्कृत–भाषाध्ययने पारंगताः भवन्ति।

अस्मिन् क्रमे अधोलिखितेषु पद्येषु अस्माभिः विना अव्ययस्य प्रभूताः प्रयोगाः संदर्शिताः सन्ति। संस्कृत–भाषायां वाक्ये यदा विना पदस्य प्रयोगो भवति, तदा तद्योगे द्वितीया तृतीया पञ्चमी चेति तिस्रः विभक्तयः भवन्ति। एताः विभक्तयः वक्तुः विवक्षानुसारं प्रयुज्यन्ते। तथापि संभाषणे प्रायः द्वितीयाविभक्तेः प्रयोगः बहुतरं भवति। अत एवास्माभिः प्रायः द्वितीयाविभक्तेः प्रयोगः कृतोऽस्ति।

एकदा एतादृशस्य कस्यचिदेकस्य नियमस्य सम्यक् बोधो भवति, तदा समयान्तरे यथावसरं प्रतिशब्दं द्वितीयाविभक्तेः तृतीयाविभक्तेः पञ्चमीविभक्तेः वा प्रयोगं कर्तुं बालाः प्रभवन्ति। एतदर्थं द्वितीयादिविभक्तीनां रूपाणि छात्रः अध्येता वा न जानाति, चेत् तेषां विभक्तिरूपाणां प्रयोगम् अपि छात्रः कर्तुं न पारयति। अस्यां स्थितौ, अस्माभिरत्र अधोलिखितेषु पद्येषु विविधप्रकारस्य शब्दस्य प्रायः द्वितीयाविभक्तिरूपाणि प्रयुक्तानि सन्ति। अत एतेषां पद्यानां पठनेन तत्तद्रूपाणां परिचयः भविष्यति, संस्कृतभाषायाः छात्रस्य कृते च स परिचयः अवश्यं लाभाय भविष्यतीति मे दृढो विश्वासः।

अत्र प्रतिपद्यम् मुक्तकम् अस्ति अतः एषु पद्येषु पूर्वापरविषयानुसंधानस्य अनिवार्यता नास्ति। परन्तु एकस्मिन् पद्ये तु विषयवस्तुनः अनुसंधानं कर्तुं शक्यते एव। इति दिक्।।)

विना वर्णं न शब्दोस्ति विना शब्दं पदं कुतः।
पदं विना तथा वाक्यं भाषा वाक्यं विना कुतः।। 1।।[1]

विना क्षेत्रं तिलं नास्ति विना तिलं तैलं कुतः।
तैलं विना पूरी न स्यात् विना पूरीं रसः कुतः।। 2।।

विना धेनुं पयो नास्ति विना पयः दधि कुतः।
दधि विना घृतं नास्ति घृतहीनं न भोजनम्।। 3 ।।

विना शिष्यं गुरुर्नास्ति गुरुकुलं गुरुर्विना।
गुरुकुलेन विना कस्य राष्ट्रस्योन्नतिरव्यया।। 4।।

विना श्रमं धनं नास्ति धनं विना न वस्तुकम्।
वस्तु विना सुखं नास्ति जीवनं किं सुखं विना।। 5।।

विना जलं कृषिर्नास्ति कृषिं विना न धान्यकम्।
धान्याभावे प्रजाभावः प्रजाभावे कुतः जगत्।। 6।।

विना धनं कुतो धर्मः पुण्यं धर्मं विना कुतः।
पुण्यं विना सुखं नास्ति सुखं विना न जीवनम्।। 7।।
(सुखाभावे सदा दुःखम्) ।। 7।।

विना हस्तं कुतः कर्म विना कर्म फलं कुतः।
फलं विना न हि सुखं सुखाभावे न मोदनम्।। 8।।

पाण्डुलिपिं विना नास्ति मेघदूतस्य शक्यता।(कल्पना)
मेघदूतं विना यक्षः जीव्यात् मे मनसि कुतः।। 9।।

1. अत्र विना शब्दस्य पर्यायत्वेन नाना अव्ययस्यापि प्रयोगः कर्तुं शक्यते। तेन चास्य पद्यस्य स्वरूपं भवति–नाना वर्णं न शब्दोस्ति नाना शब्दं पदं कुतः। पदं नाना तथा वाक्यं भाषा वाक्यं विना कुतः।। 1।। चतुर्थे पादे पञ्चमाक्षरे लघुता अपेक्षितेतिकृत्वा विना शब्दः एव प्रभावी भवतीति दिक्।।

कलां विना होराभावः होराभावे दिनं कुतः।
दिनं विना न मासोऽस्ति विना मासेन वार्षिकम्।।
10।। (वार्षिकः)
प्रजां विना मतं नास्ति मतं विना जयः कथम्।
विना जयं पदारोहः कथं भवति मन्त्रिषु।। 11।।
विना सूत्राणि पादस्य सूत्रपाठे स्थितिः कुतः।
अभावेन हि पादस्य पाणिनीयाष्टकं कुतः।। 12।।
मृदा विनेष्टिका नास्ति विनेष्टिकां गृहं कुतः।
गृहं विना न मे सारः सारहीनं न जीवनम्।। 13।।
कार्पासेन विना सूत्रं सूत्रं विना पटं कथम्।
पटाभावे कुतः लज्जा तदभावे नरः कुतः।। 14।।
(भवति नृणाम्।। 14।।)
विना रामं न विद्यते रामायणी कथा यथा।
तथा कृष्णं विना युद्धं भारतस्य न विद्यते।। 15।।
विना शकुन्तलां स्मृत्वा दुष्यन्तं यः स्मरेज्जनः।
काव्यरसं विना तस्य कथं तृप्तिः प्रजायते।। 16।।
अग्निं विना विना मन्त्रं होतारं दक्षिणां विना।
समिधया विना यज्ञः (होमः) कृतवान् कः करिष्यति।। 17।।
गुरुं विना विना ग्रन्थं लेखनीं संचिकां विना।
अद्यतने युगे छात्रः कथं पठितुमर्हति।। 18।।
नाना काष्ठं च वह्निं च स्थालीं दर्वीं विना क्वचित्।
रसवती गृहे मित्रं कथं पाकः भवेदिह।। 19।।
विनापणं विना वित्तं ग्राहकं ग्राहिकां विना।
व्यापारनाम उद्योगः कथं भवितुमर्हति।। 20।।
विना ज्ञानं विना द्रव्यं पुरुषार्थं विना क्वचित्।
शक्यते न हि कर्माणि समर्थैः कल्पितस्य वै।। 21।।
क्षेत्रं विना कृषिर्नास्ति नास्ति क्षीरं गवा विना।
पुरुषार्थं विना विद्या मुक्तिः ज्ञानं विना कदा।। 22।।
अंकुरो हि विना बीजं पत्रं न चांकुरं विना।
शाखा पत्रं विना नास्ति पादपे जम्बुकस्य हि।। 23।।
(दाडिमस्य, बकुलस्य, चम्पकस्य, खदिरस्य)
चक्रं विना गतिर्नास्ति पावकः घर्षणं विना।
वर्षां विना जलं नास्ति उद्योगः द्रविणं विना।। 24।।
सत्यं विना यशो नास्ति विना यशः द्रविणं कुतः।
अतः बुद्धिमता नित्यं कर्तव्यः सत्यसंचयः।। 25।।
जयं विना गृहस्थस्य शून्यं भवति जीवितम्।
तथा व्यापारिणः मन्ये जीवनं ग्राहकं विना।। 26।।
ज्ञानं विना हि मत्स्यस्य सत्ता न भवति क्वचित्।
ज्ञानं विना हि शिष्यस्य सत्ता कथं भवेदिह।। 27।।
प्राणान् विना यथा जीवाः जीवान् विना वनं तथा।
मित्र मे वचनं नित्यं स्मृत्वा रक्ष वनं सदा।। 28।।
विना वृक्षं कथं काष्ठं कथं वर्षां विना जलम्।
पुण्यं विना न हि सुखं सततं स्मर मानव।। 29।।
पयोदधि विना पृथ्वी पुत्रीं विना गृहं तथा।
कल्पयन् मे मनो नित्यं दुःखितं सततं भवेत्।। 30।।
पटाक्षेपं विना शक्यं लज्जायाः न निवारणम्।
तथैव कम्बलं विना न शक्यं शीतवारणम्।। 31।।
वपनेन विना बीजं न हि रोहति कुत्रचित्।
पुरुषार्थं विना भाग्यं न हि फलति कस्यचित्।। 32।।
जन्मदिनं विना गुरुं स्वकीयौ पितरौ विना।
विना मित्राणि सर्वाणि कथं सुखं भवेन्मम।। 33।।
अतः गुरुः पितरौ च मित्राणि बान्धवस्तथा।
समागच्छन्तु गेहे मे विलम्बेन विना मुदा।। 34।।
अन्तं विना हि यत्काव्यं सरसं नीरसं भवेत्।
चेतसि चिन्तयित्वाहं विरमामि विना क्षणम्।। 35।।

**प्रोफेसर एवं अध्यक्ष**
**संस्कृतविभाग, भाषासाहित्यभवन**
**गुजरात युनिवर्सिटी, अहमदाबाद-380009**

# वेदेषु पर्यावरणम्

❑ श्रीकार्तिकभाई जानी वेदगुरुजी

पर्यावरणप्रदूषणसमस्या अद्य विश्वस्य विकटा समस्या वर्तते। पर्यावरणस्य प्रदूषणाय अनेकानि तत्वानि सन्ति, किन्तु दुर्भाग्येन प्रदूषणावरोधनस्य कार्यं न भवति। आधुनिकयुगे जनाः वैदिकसंस्कृतेः मूलसिद्धान्तान् विस्मृतवन्तन्। औद्योगिक-वैज्ञानिक-भौतिक-रूपेण च मनुष्यस्य विकासः अभवत्, तस्य जीवनस्य आवश्यक-सुविधाः परिपूरिताः। तथाऽपि आध्यात्मिकदृष्ट्या मानवः दरिद्रः अभवत्। वैदिक-संस्कृतिः सदैव प्राचीनकालतः महत्वं स्थापयति। धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु प्रथमं धर्मस्य महत्वम् अत्यधिकं वर्तते। परन्तु वयं सांस्कृतिकाचारान् त्यक्त्वा भोगं प्रति गताः। मानवेन प्राकृतिकसाधनस्य उपयोगः त्यागपूर्वकं कर्तव्यः।

पर्यावरणम् अर्थात् विश्वस्य समस्तानां प्राकृतिकानां दूरेऽन्तिके वा निवसतां प्राणिनां विशेषतश्च मनुष्याणां स्वभावस्य, विचारस्य, चिन्तनस्य, च प्रक्रियायाः समष्टिः पर्यावरणनाम्ना सम्बोध्यते। वयं यत्र कुत्रापि दृष्टिपातं कुर्मश्चेदस्माकं परितः स्थिते जले, आकाशे, वायौ, ध्वनौ वा विकृतिः वर्तते। प्रदूषणं दूषयति अस्माकं शरीरं, मनः इन्द्रियाणि च। न केवलं साम्प्रतं इयं समस्या वर्तते। प्रत्युत प्राचीने कालेऽपि एतादृशी समस्या आसीत्, परन्तु ऋषिभिर्मुनिभिश्च तत्र विविधानां साधनानां माध्यमेन प्राकृतिकतत्वैस्सह संतुलनं स्थाप्यते स्म।

वेदाः संस्कृतसाहित्यस्य एव न अपि तु विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः सन्ति। एतत् तथ्यं प्राचीना, अर्वाचीनाः सर्वे विद्वांसः स्वीकुर्वन्ति। वेदः खलु मानवज्ञानस्य विश्वकोषः वर्तते। तत्र किम् अस्ति इत्यनुसन्धानापेक्षया किं नास्ति इति गवेषणं सुकरं भवति। अत्र वेदानां प्रतिपाद्यविषयः सामान्येन कर्ममीमांसा वर्तते। अर्थात् यज्ञकर्म सम्पादनार्थम् एव वेदानामाविर्भावः। ज्ञानकर्मोपासनया विषयभेदात् गद्य-पद्य-गान-रचना भेदात् वेदत्रयी इति यद्यपि श्रूयते। तथापि ज्ञानकर्मोपासनायाः समष्टिरूपः अपरवेदः अस्ति ''अथर्ववेदः''। यतो हि ऋग्यजुः त्रयो वेदाः आमुष्मिकं फलं ददति। तदा अयं अथर्ववेदः ऐहिकं फलं प्रयच्छति। अतः अथर्ववेदस्य महत्वं सर्वोपरि विद्यते।

**अथर्ववेदे पर्यावरणस्यावधारणा -**

धर्मस्य मूलस्रोतः वेदः विधिवाक्यमाध्यमेन विविधानां अनुष्ठानानां विश्वासोऽस्ति। वेदः मनुष्यस्य सकलसुखस्याधाररूपेण मन्यते। आस्था, श्रद्धा, विश्वासः, भक्तिश्चैते भावाः भगवत्प्राप्तये साधनत्वम् आपद्यन्ते। भगवतः शक्तिः असीमा। तल्लीलया जीवाः पुत्तलिका इव भावरूपताम् आसादयन्ति। जायते, अस्ति, विपरिणमते, अपक्षीयते, विनश्यतीति निरुक्तप्रतिपादि-तान् भावान् भूतानि गृह्णन्ति। विनाशः भावरूपः। एकस्य अन्तः अपरस्य आदिः च विनाशेन सूच्येते। विनाशानन्तरं पुनर्भवः भवति। भावावस्थापन्नः जीवः स्वपरिमितिं जानाति, अपरिमितिं प्रति तस्य आकर्षणं भवति। वैदिकसाहित्ये देवतापदार्थः उपास्यत्वेन वर्णितः। ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदश्चेति चत्वारो वेदाः। तेषु अथर्ववेदे ज्ञान-कर्मोपासनायाः समष्टिरूपः दृश्यते।

प्रकृत्याः अपरन्नाम पर्यावरणमिति। पर्यावरणम् शब्दः परि एवं आङ् उपसर्गपूर्वकं वृञ् वरणे धातुना ल्युट् प्रत्ययेन निष्पद्यते। येन सचराचरं जडचेतनरूपं भौतिकं जगत् आवृतं तत्पर्यावरणम्। वेदान्तः प्रस्थानत्रय्यां परिगण्यते।

**श्रीमद्भगवद्गीतायामुक्तम्-**

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।**

प्रकृतेः स्वरूपम् अष्टधा इति भगवता कथितम्। सा प्रकृतिः अथर्ववेदे सिद्धा भवति। मानवशरीरमपि पञ्चमहाभूतात्मकतत्वैर्विनिर्मितम् अत एतान् सर्वथा स्वच्छान् शुद्धान् विकृतिरहितान् कर्तुं मनुष्येण प्रयत्नः कार्यः। यदा इमानि प्राकृतिकतत्वानि प्रदूषितानि भवन्ति तदा असंख्याः विसंगतयः प्रादुर्भवन्ति। एताः प्राकृतिकाः विसंगतीः दूरकर्तुम् अस्माकं प्राचीनर्षयः पृथ्वी-अन्तरिक्ष-द्युलोकस्थितं-पर्यावरणं सन्तुलयितुं प्राकृतिकशक्तीनां गहनमध्ययनम् अकुर्वन्।

सृष्टिक्रमे देवतया सह मानवस्य साक्षात् सम्बन्धः आसीत्। मनुष्यः उपकृतः सन् देवतां प्रति कृतज्ञतां ज्ञापयति। देवोऽपि हविर्भागं स्वीकृत्य तृप्तः मानवान्तिकम् आगच्छति। देवतामनुष्ययोर्मध्ये नियतः सम्बन्धः अस्ति। मनुष्यः आनन्दप्राप्तये प्रयतमानः विलोक्यते। देवत्वमासादयितुं स प्रयासं करोति। यतो देवा आनन्दात्मानः यज्ञेन देवा निरतिशयसुखात्मकं स्वर्गलोकमगच्छन्। ''यज्ञेन वै तद् देवा यज्ञमयजन्त यदग्निनाऽग्निमजयन्त। ते स्वर्गलोकमायन्।'' यज्ञः समृद्धिकारको भवति। यज्ञेन मनुष्यः यशः द्रविणं च प्राप्नोति शतपथब्राह्मणेऽपि तदैव कथितमस्ति यद् यज्ञः सर्वेषां देवानामात्मरूपेण वर्तते। शुक्लयजुर्वेदे दशपौर्णमासेष्टअग्निहोत्रादयः प्रकृतियागाः सन्ति। योगेषु विश्वकल्याणस्य भावना वर्तते-

**आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे.................. योगक्षेमो नः कल्पताम्।**

अस्माकं राष्ट्रे अध्ययनशीलाः ब्रह्मतेजयुक्ताश्च ब्राह्मणाः सहस्राधिकानां योद्धृणां पराभवं कुर्वाणाः शूराः क्षत्रियाः आविर्भवन्तु। अस्माकं राष्ट्रे यथावश्यकं पर्जन्यः वर्षतु सर्वे वृक्षाः फलभारेण नम्राः भवन्तु। अस्मिन् राष्ट्रे सर्वेषां योगक्षेमः सम्यक् प्रचलतु। इत्याशयः मन्त्रेऽस्मिन् दृश्यते।

**अथर्ववेदे पर्यावरणसम्बन्धिविषयाः**

जगति पर्यावरणप्रदूषणसमस्या दिनमनुदिनं प्रवर्द्ध-माना दृश्यते। पृथ्वी-जल-तेज-वाय्वाकाश-यज्ञादीनाञ्च तथा विविधानां अनुष्ठानानां स्तुत्या प्रार्थनया संरक्षण-स्योपायाः अथर्ववेदे दर्शिताः सन्ति। मानवशरीरमपि पञ्चमहाभूतात्मकतत्वैर्विनिर्मितम् अत एतान् सर्वथा स्वच्छान् शुद्धान् विकृतिरहितान् कर्तुम् अथर्ववेदे प्रदर्शिताः।

**अथर्ववेदे जलपर्यावरणम्**

जलमेव जीवनस्याधारः वर्तते। जलेन विना जीवनस्य कल्पनापि न जायते। जीवन-मृत्यु-सृष्टि-प्रलयस्य च आधारः जलमस्ति। ज-अर्थात् जन्म ल-अर्थात् लयः जन्मतः लयपर्यन्तं मानवस्य जीवनं जलेन विद्यते। एवं जलस्य महत्वं स्थापयितुम् उक्तञ्च-

**महा अर्णः सरस्वती प्रचेतयति केतुना। धियो विश्वा विराजति।।**

सरस्वती कर्मप्रवाहरूपेण प्रभूतमुदकं प्रकर्षेण ज्ञापयति। स्वकीयेन देवतारूपेण सर्वाण्यनुष्ठातृप्रज्ञानानि विशेषेण दीपयति। सर्वस्यां भूमौ वृष्टिं कारयति इत्यपि सर्वजन्तुबुद्धिः प्रकाशयति तं जलं स्तुमः।

मनुष्यस्य पञ्चतत्वैः निर्मितशरीरेषु तृतीयो भागो जलम् एव शरीरे जलस्यावश्यकता अधिका। वनस्पतीनामपि उत्पत्तिः जलेन भवति जलं सुखस्याधारः जलम् औषधिः, जलं पापस्य विनाशकञ्च वर्तते। अतः जलशुद्धिकरणार्थमुक्तम्-

**आपो हि ष्ठामयो भुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे।**

आपः अस्मान्मातरः अर्थात् जलाय मातृस्थानं प्रदत्तम्। यथा माता स्वपुत्रं सेवते तथैव हे आपः यः शिवतमः शान्ततमः रसः सुखकारी भव।

**तस्माअरंगमामवो यस्य क्षयाय जिन्वथ। आपो जन यथा च नः।**

हे आपः अस्माकं पापस्य क्षयं कुरु एवञ्चास्मान् प्रजोत्पादनसमर्थान् कुरुत। अतः ज्ञायते यत् जीवानां कृते जलस्य महिमा अवर्णनीयाऽस्ति। जलं पापानां रोगाणाञ्च शमनं करोति। अभीष्टवर्षकम् अस्ति। यथा -

**शं नो देवीरभीष्टय आपो भवन्तु पीतये।**
**शं योरभिस्रवन्तु नः।**

अस्माकं स्नाने, पाने, चापः सुखयित्र्यो भवन्तु। रोगाणां, भयानां शमनं कुर्वन्तु इति भावः।

अतः मानवेन जलप्रदूषणस्य अवरोधनाय प्रयत्नः करणीयः। जलात् औषधीनां जन्म अभवत्। यदि जलं प्रदूषितं भविष्यति तर्हि तस्य प्रभावो नष्टः स्यात्। जलस्य व्ययः अधिकः न करणीयः। जलस्य प्रदूषणं अवरोधयितुं यज्ञस्याधारः वर्तते। यज्ञेन वृष्टिः वृष्ट्या प्रदूषितजलस्य निष्कासनम्।

**श्रीगोपालकृष्ण संस्कृतमहाविद्यालय**
**बिन्दु सरोवर मार्ग, सिद्धपुर, जिला-पाटण**

# देवर्षिवर्यविवृतयः

❑ डॉ. शिवदत्तशर्मा चतुर्वेदी


विद्वज्जनसमवाये सर्वा दृष्टिः सुकेन्द्रिता यत्र।
अर्चिष्यति नेत्रोत्सवप्रतिमारूपं कलानाथम्।।
अन्ये सर्वे तावत्कथयन्त्येतेऽथ यत्किञ्चित्।
कर्णौ तु सावधानौ संश्रोतुं श्रीकलानाथम्।।
आगतमात्रे यस्मिन्सभासु महतीषु स्वागते मुख्याः।
द्वारस्थिता स्वनेत्रं मार्गे स्तब्धं नु कुर्वन्ति।।
सर्वोत्कृष्टमुपाधिं यस्मै विनिवेद्य शंकराचार्याः।
स्वीयोत्तमोत्तमपदं सुसमर्थं वा सुसाधयन्त्येव।।
नखशिखपर्यन्तं यो विद्याभिर्व्याप्त एवाऽस्ते।
सर्वोपकारनिरतो विज्ञाप्यः श्रीकलानाथः।।
यद्ध्वनिमात्रेण च सन्तोषाऽवाप्तिरिह भवति।
कोऽसौ मणिमयरूपस्तदुत्तरं श्रीकलानाथः।।
सन्त्येवान्येऽद्यत्वे सुविश्रुताश्चाथ विद्वांसः।
आत्मन्यसमं दर्पं मलीमसं धारयन्त्येव।।
नूनं ते परिहार्या तथैव चोक्तं तु भर्तृहरिणापि।
ते मणिभूषितसर्पा दंशं सर्वत्र कुर्वन्ति।।
ख्यातिं कर्तुं स्वीयां नानासंघेषु यान्त्येते।
वावदूकतां निखिलां, प्रकाश्य संसाधयन्ति यल्लभ्यम्।।
पुरातनाचार्याणां सक्रोधं संस्मरणमथ कृत्वा।
तस्मान्निजसंज्ञाने सर्वोत्कर्षत्वमाहरन्त्येते।।
पुरस्कृतीनामग्रे पृष्ठेऽप्यनुधावं नित्यम्।
निषेधकाव्यरूपेषु प्रकटो विभवस्तथा चैषाम्।।
नो जानन्ति मनागपि कियतीं दयनीयतामेते।
प्रतिक्षणं प्रतियान्तः विवशीभावे विशन्त्येव।।
यस्य दिव्यग्रन्थस्य तु टीकायां ते प्रवृत्ताः स्युः।
स्वर्गस्थस्तल्लेखकवर्यो नूनं प्रकम्पितो भूयात्।।
तस्य तु दुर्दिनमेवाऽद्यत्वे संजातमात्रं वा।
एतल्लेखनशब्दा व्यथयन्तितमां तदीयशब्दालीम्।।

अथ यद्येते तावत्पूर्वे पक्षे स्थिता न स्युः।
को नाम तारतम्यं गणयतु वा श्रीकलानाथे।।
सुप्राचीना ग्रन्थाः स्वर्गस्था लेखकास्ते ते।
वाञ्छन्ति कलानाथं स्वीयं ग्रन्थं समुपदेष्टुम्।।
यत्सम्बन्धे लेखः सोऽयमुपक्रान्त एवाऽस्ते।
तत्रेदृशा विचारास्त्वरिताऽयान्त्येव मान्या।।
एकं संस्मरणं तद् व्यक्तिगतं गूहितं यावत्।
प्रकटीभावे यातुं बहिरायतं लिखाम्यद्य।।
आचार्याऽन्तिमकक्षास्थितोऽहमासं यदा काश्याम्।
आदित्यनाथझातो निमन्त्रिता मञ्जुनाथास्ते।।
कविसम्मेलनमंचे विराजिता काव्यपाठे ते।
स्वीयं काव्यं पठितुं पुनः पुनः प्रार्थिता आसन्।।
अस्मद्गृहे तथैते समागता वा सपरिवाराः।
दिवसत्रयपर्यन्तं नित्यं तेषां सुदर्शनं जातम्।।
अस्मत्पितृवरेण्याश्चैतेषां बाल्यमित्रेषु।
मूर्धन्यतां प्रयातास्तेनैवासीत्तु लाभोऽयम्।।
प्रातरुषः समये ते शिवगीतिं गातुमारब्धाः।
काश्यां तन्मुखकमलाद्गीतिः पीयूषतां याता।।
अहमेतत्सेवायां समुत्थितस्तावदत्रेदम्।
सर्वं दृष्ट्वाऽऽनन्दे ऽलौकिकरूपे निमग्न एवाऽसम्।।
अवसरमेकं तत्र तु लब्ध्वा मयका निवेदिता एते।
कविता-रचना-विषये किञ्चिदिवापीत्थमादेष्टुम्।।
कथितं तैरद्यापि स्मरामि सम्मुखमिवाऽद्यापि।
लक्ष्मी-सहस्र-काव्यं प्रभात-कालेषु पठनीयम्।।
आनुष्टुभे तु रचना पूर्वं कार्या पुनस्तावत्।
आर्याछन्दसि सिद्धिः काचित्त्वयका समासाद्या।।
मध्यस्थितं तु तावच्छन्द इदं सुखविरचितं भूयात्।
सुबृहच्छन्दो रचनासिद्धिः समधिकपरिश्रमे साध्या।।

मातङ्गीस्तोत्रं च प्रदत्तमेतैर्मदीयमुखे।
लिखितं चैतन्मयका दैनिकपाठेऽपि संकलितम्।।
तेनैवार्या जाता मदीयमातेयमद्यापि।
नूनं कविता सर्वा भट्टवरेण्यप्रसादमालेयम्।।
तत्पुत्रवरा एते नूनं सर्वेषु छन्दस्सु।
तुल्यां प्रवाहधारां सहृदयहृदये प्रवेशयन्तितराम्।।
यद्धि कवीनां निकषं तद् गद्यं तावदेतेषाम्।
सल्लेखनीप्रसूतं पुराकृतं जायते निखिलम्।।
हिन्दी-भाषा-मासिक-सत्पत्रेषु प्रकाशिता लेखाः।
पाठक-वर्गं निखिलं प्रसाद-भरितं प्रकुर्वन्ति।।
वैचारिकी तु शकटी शोधेषु च यस्य यत्र संरुद्धा।
तूर्णं सोऽप्यनुधावति विज्ञतमं श्रीकलानाथम्।।
क्षणमात्रेण च रोधो लीनो निखिलो विभासितो दृष्टः।
धावति बुद्धिश्चाग्रे शोधोपाधिं समाहर्तुम्।।
अथ येयं स्वरभङ्गी वार्तालापः प्रसन्नोऽयम्।
दृष्टिरियं वृष्टिरिवाऽमृतधारायां निमज्जनं नाम।।
भारत-संस्कृत-विद्वत्प्रकाण्डपंक्तौ शिखरपुरुषः।
शीघ्रमेव शासनगतसमुच्चपद-मानितो भूयात्।।
भूयाद्वा कस्याऽपि प्रदेशवर्यस्य राज्यपालोऽयम्।
विश्वे संस्कृत-जगतां परमो हर्षः प्रकाशितो भूयात्।।
राजनैतिके स्वार्थे न मनागपि यद्रुचिर्दृष्टा।
शासक-धुरीण-दृष्टिस्तत्राऽकृष्टा भवेन्नाम।।
हिन्दी-भाषा-विद्वानेकः श्रीविष्णुकान्तस्तु।
उत्तर-देशे-जातो विहितोऽसौ राज्यपालत्वे।।
संस्कृत-विद्वानथ चाऽद्यत्वे प्रथमस्तु राज्यपालः स्यात्।
तत्पद-योग्यो विद्वानेकः श्रीमान् कलानाथः।।
भारत-वर्षे संस्कृत-समुन्नतौ चेष्टमानानाम्।
विषयेऽस्मिन्नपि ध्यानं संजायेतेति विज्ञप्तिः।।
प्रमुखा यदि विद्वांसोऽधिकारि सविधे मतं स्वीयम्।
पत्र-प्रेषण-रूपं प्रकाशयेयुस्तदुत्तमं भूयात्।।
प्रशासनाख्ये कार्ये दक्षत्वं साधितं भूयात्।
सत्संस्कृत-विदुषामपि द्वारं नव्यं समुद्घाट्यम्।।
देश-प्रधान-मन्त्री राष्ट्रपतिर्वाथ देशस्य।
ध्यानं देयादत्र तु समीहितं संस्कृतं तस्य स्यात्।।
यद्यपि देवर्षीणां नौत्सुक्यं लोभ एव वाकश्चित्।
किन्त्वथ संस्कृत-जगतामुपकारः साधितो भूयात्।।
भारतवर्षे संस्कृत-विदुषः किल राज्यपालत्वम्।
शासकवर्गस्यापीष्टव्यं नूनमेव स्यात्।।
अधुना त्वस्माभिरियं प्रणाममाला समर्प्यते काचित्।
कृपयन्तु सदाऽस्मदुपरि देवर्षिश्रीकलानाथाः।।

**( राष्ट्रपति सम्मानितः )**
**जी-24, अरविन्द कॉलोनी**
**काशी हिन्दू विश्व विद्यालयः वाराणसी**

# संस्कृत समाचारः



जोधपुर-आयुर्वेद-विश्वविद्यालयस्य कुलपति-चरेभ्यः प्रो. बनवारीलालगौडमहोदयेभ्यः अखिलभारत-स्तरीयः संस्कृतसम्मानः महामहिमराष्ट्रपति द्वारा प्रदास्यते। प्रोफेसर गौड महोदयेभ्यः प्रशस्तिपत्रेण साकं पञ्चलक्षपरिमितः धनराशिरपि समर्पयिष्यते। प्रो. गौडमहाशयानामद्यावधि 31 पुस्तकानि प्रायः 550 शोध-आलेखाश्चापि प्रकाशितास्सन्ति। भारतसर्वकारस्य आयुषमन्त्रालयस्यैकस्यां परियोजनायां चरकसंहिताया-श्चक्रपाणिटीकायाः हिन्द्यामनुवादोऽपि प्रो. गौड-महोदयानां मुख्यगवेषकत्वे कृतो विद्यते। किञ्च केन्द्रीय-हिन्दी-संस्थानेन प्रदीयमानस्य आत्मारामपुरस्कारस्य घोषणा तु गौडमहाभागानां कृते पूर्वमेव विहिताऽस्ति। एतादृग्विशिष्टविद्वद्वरेण्येभ्यः गौडमहोदयेभ्यः भारती-परिवारः वर्धापनानि शुभाशंसाश्च विज्ञापयति।

# स्वतन्त्रभारतस्य परतन्त्रमानसिकता

❑ कविपंकजशास्त्री

1947 तमे वर्षे भारतदेशः स्वतन्त्रतां प्राप्तवान्। कीदृशी वर्त्तते सा स्वतन्त्रता अधोलिखितप्रकारेण पश्यामः-

1. पितृणां सेवातः स्वतन्त्रता कथमिति चेत्- प्राचीनभारते **मातृदेवो भव पितृदेवो** भव इयं धारणा व्यावहारिकी आसीत्, किन्तु स्वतन्त्रभारते **माता वृद्धाश्रमवासिनी भवेत् पिता वृद्धाश्रमवासी भवेत्** इयं भावना बलवती लक्ष्यते।

2. प्राचीनभारते **मातृवत्परदारेषु** इयं भावना व्यवहारे आसीत् स्वतन्त्रभारते परदारा मे दारा भवेदियं भावना बलवती दृश्यते।

3. प्राचीनभारते **वसुधैव कुटुम्बकम्** इयं भावना आसीत्, स्वतन्त्रभारते **अहमेव वसुधाधिपतिः** अन्ये समेऽपि मे **दासाः भवेयुः** एषा भावना बलवती प्रतीयते।

4. प्राचीनभारते **मद्यादिसेवनम् अहितकरम्,** किन्तु स्वतन्त्रभारते **मद्यसेवनातिरिक्तं नास्ति किमपि हितकरम्।**

5. प्राचीनभारते **जन्मना जायते शूद्रः कर्मणा द्विज उच्यते,** परन्तु स्वतन्त्रभारते जन्मना जायते ब्राह्मणः न तु कर्मणा इयमेव भावना सर्वत्र रूढा प्रतिभाति।

6. प्राचीनभारते **परोपकारः पुण्याय पापाय परपीडनम्** इयं भावना जीवनस्याधारभूता आसीत्, किन्तु स्वतन्त्रभारते **आत्मविकासाय परपीडनम् आवश्यकम्** ईदृशी भावना एव सर्वत्र दृष्टिपथे आयाति।

7. प्राचीनभारते **मा गृधः कस्य स्विद्धनम्** इयं भावना आदर्शरूपेण स्वीक्रियते स्म, किन्तु स्वतन्त्रभारते- **परधनं मे धनं भवतु** भावनेयं समेषां हृदि तिष्ठति।

8. प्राचीनभारते **सर्वे भवन्तु सुखिनः** एषा भावना समेषां कल्याणाय तत्परा आसीत्, किन्तु स्वतन्त्रभारते **सर्वे भवन्तु दुःखिनः अहमेव भवेयम् सुखी** एतादृशी भावना सर्वत्र व्याप्ता दृश्यते।

9. प्राचीनभारते **अहिंसा परमो धर्मः** अयं विचारः मुख्यः आसीत्, किन्तु स्वतन्त्रभारते **हिंसाद्वारा पदप्राप्तिः एव मे धर्मः** इयं भावना लोकप्रसिद्धास्ति।

10. प्राचीनभारते **वृद्धोपसेविनः आयुः विद्या यशो बलं च वर्धते** इति लोकव्यवहारे आसीत्, किन्तु स्वतन्त्रभारते **वृद्धं यः मारयति सः सुखी यशस्वी चास्ति।**

11. प्राचीनभारते **कर्मण्येवाधिकारस्ते मा फलेषु कदाचन** शास्त्रवाक्यमेतद् स्मृत्वा जनाः कर्मयोगिन आसन् किन्तु स्वतन्त्रभारते **फलेषु मे अधिकारः न तु कर्मणि कदाचन** एषा भावना साम्प्रतं मुख्या जाता।

12. प्राचीनभारते **परोपकाराय इदं शरीरम्** इयं भावना अस्माकं गौरवभूता आसीत्, किन्तु स्वतन्त्रभारते **परधनलोपाय इदं शरीरम्** इयं भावना प्रमुखा लक्ष्यते।

13. प्राचीनभारते **यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः** इयं भावना नारीणां संरक्षणं करोति स्म किन्तु स्वतन्त्रभारते **यत्र नार्यस्तु हन्यन्ते तत्र सफलाः मनोरथाः** इयं भावना सर्वत्र दृश्यते अतः कन्यानां गर्भ एव हननं जायते।

14. प्राचीनभारते **सत्यमेव जयते** इयं भावना लोके प्रसिद्धा आसीत् किन्तु स्वतन्त्रभारते- **असत्यमेव जयते बलेन धनेन च** एषः विचारः सर्वत्र श्रूयते।

15. प्राचीनभारते **मे भाषा मे गौरवम्** वाक्यमेतद् जीवनस्य आधारभूतमासीत्, किन्तु स्वतन्त्रभारते **आङ्गलभाषा मे गौरवम्** इयमेव धारणा प्रमुखं स्थानं भजते।

**कथं भारतस्य सद्भावना खण्डिता-**

1. परतन्त्रताकारणेन भारतस्य सद्भावना खण्डिता।
2. भारतीयशिक्षायाः विनाशेन भारतस्य सद्भावना खण्डिता।
3. वैदेशिकानाम् अनुकरणेन भारतस्य सद्भावना खण्डिता।
4. अश्लीलचलचित्राणां प्रदर्शनेन भारतस्य सद्भावना खण्डिता।

5. जाति-धर्म-वर्णादिभेदकारणात् परस्परं कलहेन भारतस्य सद्भावना खण्डिता।
6. नैतिकशिक्षायाः स्थाने उदरपूरणस्य शिक्षया भारतस्य सद्भावना खण्डिता।
7. ईश्वरस्मरणं विहाय भोगस्मरणेन भारतस्य सद्भावना खण्डिता।
8. धनलिप्सया, पदलिप्सया, आत्मगौरवलिप्सया च भारतस्य सद्भावना खण्डिता।

**भारतस्य संस्काराणां संस्कृतेश्च रक्षणाय किं कुर्मः -**

भारतस्य संस्कृतिः संस्काराश्च संस्कृतभाषायाः पठनेन च सुरक्षिता भविष्यन्ति। अतः संस्कृतस्य उत्तरोत्तर-विकासाय श्रमो विधेयः।

वैदशिकशिक्षानीतेः अनुकरणं विहाय भारतीय-मूल्यशिक्षायाः प्रसारः क्रियान्वयनं च करणीयम्।

भारतीयचलचित्रजगति संस्कारप्रदचलचित्राणां प्रदर्शनाय प्रयासः करणीयः।

मानवेषु सद्भावनायाः विकासाय सद्व्यवहारः करणीयः।

कदापि बालेभ्यः दूरवाणी न प्रदेया, यतः तेन बाला, अध्ययनात् विमुखाः भवन्ति।

अनेन प्रकारेण वयं भारतं विकसितं सुसंस्कृतं सुसम्पन्नं च कर्तुं शक्नुमः एतदर्थं या वैदेशिकी मानसिकता अस्माकम् अन्तःकरणेषु उपविष्टास्ति तस्याः सर्वथा-परित्यागः करणीयः भवेदिति।

**सन्दर्भग्रन्थाः 1) श्रीमद्भगवद्गीता, 2) ईशोपनिषद्, 3) हितोपदेशः, 4) मुण्डकोपनिषद् 5) नीतिशतकम् 6) मनुस्मृतिः, 7. तैत्तिरीयोपनिषद्।**

**राजकीयवरिष्ठमाध्यमिकविद्यालयः**
**सराहरः ज़िला-कुल्लू हिमाचलप्रदेशः 172033**

# सूक्ति-सुधा

**❑ डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**व्याघ्र चौरारिसर्प्पाग्निर्तीव्ररोगविषाणि च।**
**एकस्मिन् ददते दुःखं भोगाः संख्यातिगे भवे।।**

- व्याघ्र, चौर, शत्रु, सर्प, अग्नि, तीव्र रोग और विष एक ही जन्म में दुःख देते हैं, परन्तु भोग असंख्य/अनेक भवों में दुःख देते हैं।

**पन्थानौ द्वौ न गम्येते पथिकेन यथा तथा।**
**यद्यक्षसुखमत्यक्षं सुखं न स्यात्कदाचन।।**

- जिस प्रकार एक पथिक के द्वारा दो मार्ग नहीं जाये जाते, उसी प्रकार एक जीव के इन्द्रिय सुख और अतीन्द्रिय सुख नहीं हो सकते।

**प्रार्थयन्ति न सद्योगानिन्द्रचक्रादिगोचरान्।**
**क्वचिद् भोगान्समीहन्ते मुनयः पापवर्द्धकान्।।**

- मुनि जब, इन्द्र चक्रवर्ती आदि प्रशस्त भोगों की भी कभी चाह नहीं रखते तब पाप वर्द्धक भोगों से कैसे बांधा करेंगे।

**नैव भोगं त्यजेद्यस्तु मुद्रां गृह्णाति केवलम्।**
**तपश्च ध्यानमौनादि सर्वं तस्य वृथा श्रमः।।**

- जो भोगों को तो छोड़ता नहीं है, केवल मुनि मुद्रा को ग्रहण करता है उसका तप और ध्यान, मौन आदि सभी व्यर्थ परिश्रम है।

**दुरितकुरुहकन्दं दुःखसंतापबीजं,**
**नरकविषममार्गं धर्मवृक्षानलं च।**
**विकलकरमसारं दुःखपूर्णं त्यज त्वं,**
**मुनिजनघननिन्द्यं सर्वभोगं दुरापम्।।**

- जो पाप रूपी वृक्ष का कन्द है, दुःख रूप संताप का बीज है, नरक का विषम मार्ग है, धर्मरूप वृक्ष को भस्म करने के लिए अग्नि है, विकलता को करने वाला असार है, ऐसे दुःख पूर्ण, मुनिजन द्वारा निन्दनीय सभी भोगों को छोड़ो।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# वास्तविकं स्वातन्त्र्यम्

❑ दीपककुमारचौधरी ( दीपकवात्स्यः )

अस्मदीयं राष्ट्रं भारतं सप्तचत्वारिंशदुत्तरनवदशतमाब्दस्य अगस्तमासस्य पञ्चदशके दिनाङ्के स्वातन्त्र्यमलभत। स्वतन्त्रताप्राप्त्यर्थं नैके राष्ट्रैसेवाव्रतिनो भारतीयपुत्रा नैजान् प्राणान् अत्यजन्। तेषां राष्ट्राय हुतात्मना त्यागशौर्य-बलिदानादिकं नितरां स्मृतिपटले सदस्मदीयहृच्चेतनासु ''इदं राष्ट्राय इदं न मम'' इति श्रुतिवचनं स्मारयेत्तथा राष्ट्राय समर्पणभावं जागरयेदित्यादिकं लक्ष्यीकृत्य भारतसर्वकारेण तद्दिनं राष्ट्रियपर्वत्वेनाद्धुष्टमथ च समग्रभारते ''स्वतन्त्रता-दिवसः''''स्वातन्त्र्योत्सवः'' समायोज्यते। अनेन लक्ष्मीक्रियते महत्काठिन्येन यल्लब्धं स्वातन्त्र्यं तत्पुनः पारतन्त्र्ये परिवर्तितं न स्यात्। अत्र मनसि नैकाः जिज्ञासाः समुद्भवन्ति। तद्यथा-

1. किं नाम स्वातन्त्र्यम्? 2. किमर्थं स्वातन्त्र्यम्? 3. स्वातन्त्र्यस्य वास्तविकं स्वरूप किम्? 4. कथं या परिरक्षितं स्याद्भारतीयं स्वातन्त्र्यम्?

तत्र सर्वादौ विचारयामो वयं ''किन्नाम स्वातन्त्र्यम्''। स्वातन्त्र्यमिति पदं स्वतन्त्रपदान्निष्पद्यते। यत्कृते आङ्गल-भाषायां "Freedom" इति पदं प्रयुज्यते। इदञ्च स्वातन्त्र्यपदं ''स्वम् ( आत्मीयम् ) , तन्त्रं ( प्रधानं सिद्धान्तो विस्तारो वा'' इति द्वाभ्यां पदाभ्यां नैकविधव्युत्पत्तिद्वारा व्युत्पादयितुं शक्यते। स्वस्य तन्त्रमिति षष्ठीसमासव्युत्पत्त्या आत्मनः प्राधान्यमित्यर्थः ''तन्त्रं प्रधानं सिद्धान्त'' इति कोशवचनात्। स्वं तन्त्रं यत् तत् स्वतन्त्रम् इति कर्मधारयासमासव्युत्पत्त्या आत्मीय-शासनमात्म-शासनं वेत्यर्थ,'' ''तन्त्रं शासनम् इति वचनात्। स्वं तन्त्रं यस्येति बहुव्रीहिसमासव्युत्पत्त्या स्वतन्त्रोऽर्थात् स्वाधीनः प्रमुखो जनविशेष इत्यर्थः। इत्थं स्वस्य प्राधान्यं यस्मिन् शासने राष्ट्रे वा तत् शासनं राष्ट्रं वा स्वतन्त्रम्। यस्य प्राधान्यं स जनः सिद्धान्तो वा स्वतन्त्रः। स्वतन्त्रस्य भावः स्वातन्त्र्यम् इति।

साम्प्रतं ''किमर्थं स्वातन्त्र्यम्'' इति विचारयामः- कस्याश्चिद् व्यक्तेः शारीरिक-मानसिकः-आध्यात्मिक-शैक्षिक-धार्मिक-नैतिक-भौतिकादिविकासान् अभिवर्धयितुं तथा कस्यचिदपि राष्ट्रस्य सर्वविधौन्नत्यर्थं राष्ट्रगौरवसंस्कृति-सभ्यतादीनां संरक्षणार्थञ्च स्वातन्त्र्यं नितरामावश्यकम्। यतोहि पारतन्त्र्ये ( बन्धने परीधीनतायां वा) कस्यचिज्जीवाय राष्ट्राय च स्वोन्नतिविकासावसरो नोपलभ्यते। अतः जीव-मात्रस्य राष्ट्रस्य च उन्नत्यै स्वातन्त्र्यमती आवश्यकस्म्।

अधुना भारतीयपरिप्रेक्ष्ये स्वातन्त्र्यस्य वास्तविकं स्वरूपं परिशीलयामः। भारते स्वातन्त्र्यस्य वास्तविकं स्वरूपं विश्ववन्द्या भारतीयसंस्कृतिर्वर्तते। तत्रैते मुख्यबिन्दुवो मन्मतौ अन्तर्भवन्ति-

1. सर्वेषामधिकारः स्वतन्त्रता। 2. सर्वधर्मसमादरः। 3. जीवनशैली आचारव्यवहारः लौकिकपरम्पराश्च। 4.भाषा-वेशभूषा-भोजनादिकम्। 5. सभ्यता शासनव्यवस्था च। 6. आध्यात्मिकैतिहासिकभौतिकसमृद्धयः। 7. समृद्धसाहित्यम्। 8. विश्वबन्धुत्व-लोकहितचिन्तन-जनकल्याणादि-भावना।

एते समेऽप्यंशाः स्वातन्त्र्यस्य वास्तविकं स्वरूपं बोधयन्ति। साम्प्रतं विचारयामः ''कथं वा परिरक्षितं स्यात् स्वातन्त्र्यम्'' इति।

1. वेदबोधिताचारलक्षणधर्मपुरस्सरं नैतिकव्यवहारेण स्वातन्त्र्यं परिरक्षितं स्यात्। 2. कामक्रोधलोभमोहादिवर्जनपुरस्सरं मनसानिशं स्वहितपरहितचिन्तनेन। येन स्वप्नेऽपि कस्यचिज्जी-वस्याहितं न स्यात्। यतः तस्य स्वातन्त्र्यं नश्येदिति चिन्तनेन। 3. जिनस्य स्वातन्त्र्यरक्षणाय अन्येषां स्वातन्त्र्यं न हन्यात्। अर्थात् जिनस्वातन्त्र्यरक्षणक्रमे अपरेषामपि स्वातन्त्र्यं परिरक्षणीयम्। येन एषा व्यवस्था परिरक्षिता स्यात्।

महद्दौर्भाग्यं वर्तते यदद्यत्वे वयं भारतीयाः निजप्राणभूततत्त्वं विश्ववन्द्यां भारतीयां संस्कृतिं सन्त्यजन्तः पुनः पारतन्त्र्यपथे नित्यं वर्धमानाः नित्यं पाश्चात्यसंस्कृतिम् अनुकुर्मः। तत्र चिन्त्या अंशाः-

1. सर्वप्राचीनभारतीयसभ्यतां विस्मृत्य पाश्चात्यसभ्यतायाः गुणगानं कुर्मः। 2. परधर्मं निन्दामः। 3. स्वजीवनशैलीं विस्मरन्तः पाश्चात्यजीवनशैली-माचरामः। तद्यथा-

अर्धनग्नवस्त्रं धरामः, स्नानपूजादिकं विनैव भोजनं कुर्मः, मदिरादिपानं कुर्मः, परस्परं विद्विषामहे, मातृपित्रादिकं सन्त्यजामः वारम्वारं निजपत्नीं सन्त्यज्य परपत्न्या सहामर्शनं कुर्मः, विवाहात् पूर्वमेव स्त्रीसंसर्गं कुर्मः प्रेमदिवसादिक-मायोजयायामश्च।

4. निजभाषां विहाय पाश्चात्यभाषां भाषमाणा गौरवं प्रदर्शयामः। 5. आध्यात्मिकैतिहासिकभौतिकसमृद्धीः न गणयामः। 6. निजशासनव्यस्थायाः विखण्डनं कुर्मः। 7. निजसाहित्य-सम्पदायां दोषं दर्शयामः। 8. विश्वबन्धुत्वादिभावं न स्मरामः। 9. स्वार्थसिद्धौ पराहितं कुर्मः।

इत्थं वक्तुं शक्यते यद् वयं स्वतन्त्राः सन्तोऽपि वस्तुतो मानसिकरूपेण परतन्त्रा अद्यापि। अनिशं वयं पारतन्त्र्यं वर्धमानाः स्मः। यदा भारतीयनागरिका मानसिकरूपेण स्वतन्त्राः भविष्यन्ति तदैव वस्तुतो नागरिकाः स्वतन्त्राः, अस्मदीया शासनव्यवस्था स्वतन्त्रा अस्मदीयं राष्ट्रञ्च स्वतन्त्रम् इति शम्।

**राष्ट्रियसंस्कृतसंस्थानम्**
**जयपुरपरिसरः ( व्याकरणविभागः )**

राष्ट्रपतिपुरस्कार 2019 सभाजितेभ्यो नमः-

# अधिगतयशसो गौड़वंशावतंसाः

❑ प्रो. ताराशंकरशर्मा पाण्डेयः

**येटावाभोपजीभूर्जयपुरनिकटे तत्र गौडावतंसो गेन्दीदेवीति माता तनुजनकवरः श्रीलप्रह्लादरायः। तत्पुत्रो भाग्यशाली ग्रहगणपठकैर्घोषितो जन्मकाले सुग्रामे रींगसाख्ये गुरुकुलपठितो भाजते गौड़वर्यः।।1।।**

भाषार्थ- जयपुर के निकट ईटावा-भोपजी नामक जो स्थान है वहां पर गौड ब्राह्मण कुलभूषण श्री प्रह्लाद राय जी पिता और माता गेन्दी देवी के पुत्र के जन्म के समय ही ज्योतिषियों ने घोषणा कर दी थी यह भाग्यशाली होगा, रींगस गांव के गुरुकुल में पढ़े हुए श्री बनवारीलाल जी गौड़ विप्रों में श्रेष्ठ हैं।।1।।

**अथ परगुरुभिस्तैर्विज्ञनारायणाख्यैः**
**सुरगिरि पटुतैभ्यः शिक्षिता कांकराद्यैः**
**जनहितकरणं तैर्वैद्यकीयादिशास्त्रं**
**मुखगतमिव लब्धं रामकृष्णादिवेतुः।।2।।**

भाषार्थ- प्रारम्भिक शिक्षा के बाद विद्वान् श्री नारायण शास्त्री कांकर आदि श्रेष्ठ गुरुओं ने इन बनवारी लाल जी गौड़ को संस्कृत भाषा में कौशल सिखाया। इन्होंने श्री रामकृष्ण ढंढ आदि विद्वान् गुरुओं से जन हितकारी आयुर्वेद आदि अनेक शास्त्र पढे जो मानो कण्ठगत ही हैं।।2।।

**आयुर्वेदीयलेखा नवनवविषया भारतीपत्त्रिकायां दीयन्ते विज्ञवर्य्यैर्विविधगदहरा गौड़वंशावतंसैः। येनारोग्यं लभन्ते गदगलितशरीराः पीडिता ये मनुष्या आशीराशिं ददन्ते मनसि प्रमुदिताः स्वस्थतामाप्य दीनाः।।3।।**

भाषार्थ- गौड़वशं भूषण विद्वद्वर्य श्री बनवारीलाल जी ''भारती'' संस्कृत मासिक पत्रिका में आयुर्वेद के नये नये विषयों पर अनेक बीमारियों को दूर करने से संबंधी लेख प्रतिमास देते रहते हैं, इन लेखों से ज्ञान प्राप्त कर बीमारी से जर्जर शरीर दीन दु:खी मनुष्य नीरोग होते हैं तथा स्वस्थता प्राप्त कर मन में प्रसन्न होकर ढेरों आशीर्वाद देते हैं।।3।।

**आयुर्वेदीयशिक्षे समितिमतदिशा विश्वविद्यालयेऽपि संस्थानाध्यक्षभूता निजप्रतिभया ये कौलपत्यं दधानाः।**
**नैकान् ग्रन्थान् लिखित्वा न्यधिगतयशसोऽनेक-**
**सम्मानभाजो धन्यास्ते सन्ति मान्या**
**'बन' पदसुवृता वारिलालाः सुगौड़ाः।।4।।**

भाषार्थ - जो श्री गौड़, राष्ट्रीय आयुर्वेद संस्थान, जयपुर के अध्यक्ष/निदेशक रहे तथा बाद में चयन समिति के मतानुसार राजस्थान आयुर्वेद विश्वविद्यालय, जोधपुर के कुलपति पद को धारण करते हुए आपने अनेक ग्रन्थों की रचना करके यश प्राप्त किया। राष्ट्रीय एवं राज्यस्तरीय अनेक सम्मान पाने वाले ऐसे श्री बनवारीलाल गौड़ धन्य है और हमारे लिस सम्मान्य हैं।।4।।

**नियमितदिनचर्यो वैद्यवर्यो विपश्चिद्**
**विचरचितनवगद्यो मानितो बाणभट्टः।**
**निजकुलतिलकोऽसौ सत्कृतो राष्ट्रनाथै-**
**र्विलसति बनवारीलालगौड़ो मनस्वी।।5।।**

भाषार्थ - विद्वान्, श्रेष्ठ वैद्य तथा अपनी दिनचर्या नियमित रखते हुए जिन्होंने ''आयुर्वेदीयकथाष्टकम्'' नामक नवीन गद्यकाव्य की रचना की और इस कृति पर उत्तर प्रदेश संस्कृत संस्थान, लखनऊ से बाणभट्ट पुरस्कार प्राप्त किया। ऐसे अपने कुल के भूषण श्री बनवारीलाल जी गौड़ राष्ट्रपति से सम्मानित होकर शोभित होते हैं।।5।।

**आचार्यचरो विभागाध्यक्षश्च संस्कृतसाहित्ये**
**ज.रा.राजस्थानसंस्कृतविश्वविद्यालय, जयपुरम्**

# ज्योतिश्शास्त्रेण सह वास्तुशास्त्रस्य सम्बन्धः

❑ मुकेश कौशिक

ज्योतिश्शास्त्रस्य वास्तुशास्त्रस्य च महान् सम्बन्धः अस्ति। वास्तुशास्त्रस्य पूर्णक्षेत्रे ज्योतिश्शास्त्रस्य प्रभावोऽस्ति। ज्योतिश्शास्त्रस्याभावे तु वास्तुशास्त्रस्य कल्पना अपि कर्त्तुं न शक्यते। वास्तुशास्त्रस्य आरम्भः अन्तश्च ज्योतिश्शास्त्रेणैव भवति यथा वयं गृहनिर्माणाय विचारं कुर्मः तर्हि वास्तुशास्त्रानुसारं सर्वप्रथमं दिक्साधनं, मेलापक-आयादिविचारं च कुर्मः तदनन्तरं भूमिं प्रतिक्षणं शोधनञ्च कृत्वा भूमिं पूजयित्वा गृहस्य निर्माणं प्रारभ्यते। सूक्ष्मतया दर्शनेन ज्ञायते यत् दिक्साधनं, मेलापक, ग्रामवास-विचारः, काकिव्यादि-विचाराश्च ज्योतिश्शास्त्रे एव आधारिताः सन्ति।

भवन-निर्माणस्य आरम्भानन्तरमपि ज्योतिशास्त्रस्य कार्यं स्वयंसिद्धमस्ति। द्वार-निर्धारणं दिक्-निर्धारणं द्वारस्थापनस्य मुहूर्तः आच्छादन-मुहूर्तः चेत्यादयः विभिन्नानां मुहूर्त्ताणां विचारानन्तरं गृहप्रवेशो वास्तुज्ञानं, वास्तुशास्त्रादिभिः कर्माणि ज्योतिषाधारेणैव क्रियन्ते।

यदि कोऽपि जनः वास्तुविरुद्धे निर्मिते भवने निवासं करोति चेत् सः जन उन्नतिं कुर्वन् अपि मानसिक अवसादेन अन्यैः च दुःखैः ग्रस्तो भवति। यदा तस्य जनस्य ग्रहाः निर्बलाः भविष्यन्ति तर्हि वास्तुविरुद्धे निर्मिते भवने निवासेन तस्य कष्टेषु वृद्धिर्भवति। परन्तु यदि सएव जनः वास्तुशास्त्रानुगुणं निर्मिते भवने निवसति तथा च यदि तस्य ग्रहाः अपि निर्बलाः भवन्ति तर्हि सः ग्रहदोषवशाद् उत्पन्नव्याधीनां प्रत्यक्षं तु करोति परन्तु भवने वास्तु-अनुगुणे सति तस्मिन् ज्ञाने आत्मबलस्य वृद्धिर्भवति तथा च सः आत्मविश्वासयुक्तो भवति।

भूमिकारकः ग्रहः भौमः अस्ति। तथा च प्रत्येकं जनस्य कुण्डल्यां चतुर्थ-भावः भूमिः तथा च भवन-सम्बन्धिनो भवति। भवन-प्राप्त्यर्थं चतुर्थभावस्य स्वामी केन्द्रे त्रिकोणे वा आवश्यकं भवति। सहैव कुण्डल्यां भौमस्य स्थितिरपि उत्तमा भवितव्या।

ज्योतिष-वास्तुशास्त्रयोः प्रगाढतां साधयितुं केचन सिद्धान्ताः प्रस्तूयन्ते-

1. यदि कुण्डल्यां चतुर्थेशः दशमे भावे स्यात् दशमेशश्च चतुर्थे भावे स्यात् भौमश्च बली भवति चेत् जनः भू-सम्पदायुक्तो भवति।

2. यदि तृतीयभावस्य कारकः भौमः चतुर्थेशेन सह स्यात् चेत् स्वभ्रात्रा भूमिं सः प्राप्नोति।

3. द्वितीय-एकादशभावयोः ईशो यदि चतुर्थे भावे स्यात्, चतुर्थेशश्च शुभग्रहैः युक्तो भवेत् तर्हि जनाय धन-भूलाभौ भवतः।

4. चतुर्थेशश्च नवांशस्य स्वामी यस्यां राशौ स्यात् तद्राशेः एव नवांशस्य स्वामी केन्द्रे स्यात् चेत् भवनस्य लाभो भवति।

5. यदि लग्नेशः चतुर्थे भावे स्यात् तथा च चतुर्थेशः लग्ने स्यात् चेत् जनः भवनलाभं करोति।

6. यदि चतुर्थेशः स्वराशेः भवेत् तथा च बली भूत्वा दशमे स्थाने च शुभग्रहैः दृष्टो भवति चेत् भूमेः लाभः अवश्यमेव भवति।

7. यदि चतुर्थभावः चतुर्थेशश्च शुभग्रहैः युक्तो भवेत् तदा जनः भूसम्पदः स्वामी भवति।

8. यदि शुक्रः सुखभावे, सुखेशश्च सप्तमे भावे स्यात् एतौ द्वौ मित्रग्रहौ स्यातां तर्हि स्त्रीद्वारा भूलाभो भवति।

9. यदि लग्नेशः चतुर्थेशश्च चतुर्थे भावे स्यातां तर्हि सहसैव भवनस्य लाभो भवति।

10. यदि द्वौ लग्ने स्यातां स्वोच्चे भूत्वा स्वराशेः भूत्वा शुभग्रहैः युक्तो स्यातां तर्हि अनायासः एव भूलाभो भवति।

11. यदि षष्ठेशः चतुर्थे भावे स्यात्, चतुर्थेशश्च षष्ठे भावे स्यात् षष्ठेशात् च चतुर्थेशः अधिको बली स्यात् चेत् जनस्य शत्रुद्वारा भू-प्राप्तिर्भवति।

12. यदि चतुर्थेशः बली भूत्वा केन्द्रे शुभग्रहैः दृष्टो भवति चेत् जनं भवनस्य लाभो भवति।

एवं वक्तुं शक्यते यत् ज्योतिष-वास्तुशास्त्रयोः महासम्बन्धः अस्ति। प्राचीनऋषयः अस्माकं संस्कृतेः सर्वेषां भागानां वैज्ञानिकाधारप्रदानाय विलक्षणप्रयासं कृतवन्तः। वास्तुशास्त्राय पूर्णतः वैज्ञानिक आश्रयप्रदान-स्य उद्देश्यं मनुष्यं मर्यादितं कृत्वा तस्य कल्याणस्य भावना सर्वोपरि अस्ति। प्राचीनकाले यासां 64 विधानां कलानां वर्णनमस्ति तासु वास्तुशास्त्रमपि सम्मिलित-मस्ति। वास्तुशास्त्रीयग्रन्थेषु वर्णिताः सर्वे वास्तुनियमाः पर्यावरणशुद्धौ योगदानं ददति। येन प्रकारेण ज्योतिषानुगुणं अर्थात् राशेरनुसारं वृक्षाः आरोप्यन्ते तेनैव प्रकारेण दिक्चयनं वास्तु-अनुगुणं क्रियते।

वास्तु तथा च ज्योतिष सिद्धान्तानुसारं भवनं परितः वृक्षाणाम् आरोपणं कृत्वा निवासः हितकारी भवति पर्यावरणस्य उद्देश्यं मानवस्य सुखं तु अस्ति एव सहैव सर्वेषां जीवानां, पादपानां, वृक्षाणां, जलस्य च सुरक्षा अपि अस्ति। वास्तुतः आधारः क्षिति-जल-पावक-गगन-वायवः सन्ति। यावत् महत्त्वं एतेषां वास्तुशास्त्रे अस्ति तावदेव महत्त्वं ज्योतिषे अपि अस्ति।

**शोधार्थी,**
**30, जीवन विहार, निशि विद्या मन्दिर स्कूल के पास**
**हीरापुरा, जयपुर-302021**

# संस्कृत समाचारः

❑ **श्वेता दाधीच**



आदर्श विद्या मन्दिर ब्यावरनगरे श्रावणी पूर्णिमायाः दिवसे एव संस्कृत दिवसस्य आयोजनम् अभवत्। प्रधानाचार्येण श्रीमता लादूराम सिरवी निम्बार्क वैदिक संस्कृत समित्याः संयोजकेन बद्रीप्रसाद शर्मा महोदयेन दीप प्रज्ज्वालनं कृतम्। हरीशमहोदयेन संस्कृतेनैव मञ्च संञ्चालनम् कृतम्। संस्कृत श्लोक प्रतियोगिता आयोजिता संस्कृत गीत प्रतियोगिता अपि आयोजिता। ये छात्राः प्रतियोगितायां विजेतारः आसन् ते उत्साहवर्धनाय निम्बार्क वैदिक समिति संयोजकेन पारितोषिकेण मञ्चे सम्मानिताः। निम्बार्क वैदिक समित्याः सहसंयोजिकया श्रीमत्या श्वेता दाधीच महोदयया उक्तम् यत् संस्कृतभाषैव सर्वासां भाषाणां जननी अस्ति अस्याः भाषाया अन्यभाषाणामुत्पत्तिः अभवत्। तया कथितम् यत् संगणकस्य कृते सर्वत्र संस्कृत भाषा अन्यभाषापेक्षया उपयुक्ता वर्तते। अस्मिन् संस्कृत-सम्मानसमारोहे संस्कृताध्यापक-जितेन्द्रमहोदयस्य कृते सर्वश्रेष्ठ संस्कृत शिक्षक सम्माननं दत्तम्। अनेके संस्कृतानुरागिणः आगतवन्तः। तेषु ब्यावर अजमेरमण्डल-स्य संयोजकः बद्रीप्रसाद शर्मा दीपक शर्मा सहसंयोजिका श्वेता दाधीच महोदयाः च उपस्थिता आसन्।

**संस्कृत समाचारः**

# राष्ट्रपतिसम्मानः

ऐषमो राष्ट्रपतिसम्मानाय चिताः संस्कृत-विद्वांसः सन्ति-मान्याः सत्यनारायण मूर्तिः, राजेन्द्रनाथ शर्मा, रामजी ठाकुर, चाँदकिरण सलूजा, श्रीकृष्णशर्मा, वी. रामकृष्ण भट्ट, जनार्दन हेगडे, कला आचार्य, हरेकृष्ण सतपथी, सत्यदेव शर्मा, बनवारीलाल गौड़, वी.एस. करुणाकरन्, युगलकिशोर मिश्र, मनुदेव भट्टाचार्य, सुबुद्धिचरण गोस्वामी इतिनामानः।

बादरायण-व्यास-सम्मानाय सर्वश्री अशोक थपलियाल, सुजाता त्रिपाठी, संजू मिश्रा, अभिजित हनुमन्त जोशी, शरच्चन्द्र द्विवेदी चिताः। प्राकृतभाषायाः कृते कमलचन्द सोगानी वर्याय सम्मानः प्रदास्यते।

# श्रीअजमल-भक्ति-गाथा ( काव्यम् )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

( गताङ्कादग्रे )

स्पर्शनात् श्यामवर्णोऽभून्ननर्त पश्यतां सताम्।
आरुह्य रामसा सद्यस्तमश्वं न चचार ह।। 132।।
दिव्यञ्चैतच्चमत्कारमद्भुतं तदलौकिकम्।
देवत्वञ्चैव सामर्थ्यं दर्शयित्वाऽऽगतो भुवम्।। 133।।
'श्रीरामसा' वीररसाभिषिक्तो
ऽगृह्णात्तमश्वं गरुडावतारम्।
तेजोमयं राजकुलानुरूपं
दधार भल्लं त्वतितिग्मधारम्।। 134।।
मायवी राक्षसो ह्यादू बालान् हन्तुं समागतः।
नीत्वा वीरमदेवञ्च सत्वरं गगनं गतः।। 135।।
रामसाऽप्यश्वमारुह्य सद्यो देवोम्बरं गतः।
भ्रातरं मोचयित्वैव युयुधे राक्षसेन खे।। 136।।
भल्लेन हृदयं तस्य विभेद्य निजघान ह।।
पपात भूतले रक्षो भस्मसादभवत् क्षणात्।। 137।।
निक्षिप्तं कन्दुकं दूरमानेतुं रामसा गतः।
आश्रमं सुखदं भव्यं घोरेऽरण्ये ददर्श ह।। 138।।
आश्रमस्थं महात्मानं बालीनाथं तपस्विनम्।
''रामसा'' तं गुरुं कृत्वा धर्मरक्षाव्रतं दधौ।। 139।।
गुरुणा बालिनाथेन प्रेरितोऽमितविक्रमः।
आशुगमश्वमारुह्य प्रतस्थे लोकरक्षकः।। 140।।
भगवान् श्रीरामसादेवः कुमारः पञ्चहायनः।
भैरवं राक्षसं हत्वा ररक्ष पीडिताः प्रजाः।। 141।।
द्वापरे बालकृष्णेन निहता गोकुलेऽसुराः।
युगेऽस्मिन् रामदेवेन राक्षसा निहता मरौ।। 142।।
निशम्य सुखदां वाचं राजा पूर्णमनोरथः।
प्रणम्य द्वारकानाथं जय जयेत्यब्रवीद्वचः।। 143।।
युगावतारोऽखिललोकपूज्यः
श्रीरामदेवः करुणावतारः।
ग्रामो रुणीचा भुवि सिद्धभूमि-
र्भक्त्याः प्रतापोऽजमलस्य नूनम्।। 144।।

गृहस्थसरसो राज्ञः पुत्रप्राप्त्यन्तरं ततः।
तद्गृहे सुगना लाछा द्वे पुत्र्यौ च बभूवतुः।। 145।।
राजा संस्थापयामास दुर्गं पोकरणं परम्।
भव्यं दृढं विशालञ्च सर्वसौविध्यसंयुतम्।। 146।।
सानन्दं सदने राजा धनधान्यसमृद्धिमान्।
सभार्यः सपरीवारो दासदासीसमन्वितः।। 147।।
अनासक्तो वसंस्तत्र बुभुजे राजसं सुखम्।
यथाकालं यथायोग्यमेकैकशो यथाविधि।
ज्येष्ठपुत्रस्य पुत्र्योश्च विवाहं कृतवान् नृपः।। 148।।
दुर्गं पोकरणं ''लाछा'' पारिबर्हे ययाच ह।
कन्यावर-सुखायैव दुर्गं राजा ददौ मुदा।। 149।।
बाणयुग्मश्रुतिब्रह्म-संख्याते शुभवत्सरे।( वि.सं. 1425 )
संस्थाप्य ग्राममेयाय रुणीचां ''रामसा'' ततः।। 150।।
ततो वीरमदेवोऽपि रुणीचा-दक्षिणे दिशि।
ग्रामं संस्थापयामास नाम्ना ''वीरमदेवरा''।। 151।।
अमरकोट-नरेशश्च सोढ़ा दलपतिस्तदा।
क्षत्रियो विश्रुतो वीरो धीरश्चासीत्प्रजाप्रियः।। 152।।
रामदेवं स्वकन्यायै स्वप्ने श्रुत्वा वरं वरम्।
प्रैषयत् श्रीफलं मुद्रां सम्बन्ध-स्थापनेच्छया।। 153।।
सोढ़ासम्प्रेषितां वार्तां स्वीकृत्याजमलो नृपः।
वैवाहिकं मुहूर्तञ्च विनिश्चित्योत्तरं ददौ।। 154।
आदौ विनायकं गौरीं ग्रहांश्च कुलदेवताः।
सम्पूज्य विधिद्राज्ञा कृतो वैवाहिको विधिः।। 155।।
सुसज्जिताश्वैश्च रथैरथोष्ट्रै
र्बारातलोकाः प्रथिताः प्रयाताः।
नीलाश्वमारुह्य वरोऽभिरामः
श्रीरामसाऽऽग्रे शुशुभे यथेन्दुः।। 156।।
रुक्मिण्यंश-कलाजाता सोढा राज-कुले तदा।
कन्या नेतलदे नाम्नी रामसा-सहधर्मिणी।। 157।।

पुत्री दलपतस्यैषा पङ्वी च मन्दलोचना।
पाणि-ग्रहणमात्रेण जाता सर्वाङ्गशोभना।। 158।।
गौरी जनकवर्णाभा दिव्या देवी सुलोचना।
रामसा-पाणि-संस्पर्शात् सद्यः कन्या सुशोभना।। 159।।
वरस्यैतच्चमत्कारं दृष्ट्वा लोकाः सुविस्मिताः।
नार्यो मङ्गलगीतानि गायन्त्यो ननृतुर्मुदा।। 160।।
शुभशिषः प्रयच्छन्ति दाम्पत्य-सुख-सिद्धये।
सोढातोमर-बंशीयाः क्षत्रियाः हर्षितास्तदा।। 161।।
परस्परं प्रशंसन्तः सौभाग्यं वर-कन्ययोः।
बहुलं पारिबर्हञ्च ददौ कन्या-पिता नृपः।। 162।।
दासदासीजनांश्चैव स्वर्णरौप्याम्बराणि च।
मिष्टान्नैर्मधुरैः पेयैः पदार्थैर्मोदकैस्तथा।। 163।।
युवानः क्षत्रियाः वृद्धाः सम्बन्धिनः सभाजिताः।
अमरकोटाच्च प्रस्थानं बारातेन कृतं ततः।। 164।।
बारातगमने वाद्य-ध्वनिं श्रुत्वा प्रहर्षिताः।
विहाय सर्वकार्याणि गता राजगृहाङ्गणम्।। 165।।
प्रभुं श्रीरामसादेवं वधूं राज-कुलाङ्गनाम्।
द्रष्टुं लोकाः समायाताः नार्यश्च मुदिताननाः।। 166।।
निशम्याजमलो राजा लौकैर्वर्धापनानि च।
हिरण्यरौप्यमुद्राणां ददौ दानं स्मिताननः।। 167।।
प्रभुः श्रीरामसा देवश्चमत्कारान्नलौकिकान्।
प्रदर्श्य विश्रुतो लोके महासिद्धो विभूतिमान्।। 168।।
यावनैर्भ्रंशिताः लोकाः बलाद्धर्मान्तरं गताः।
रामदेवं समाश्रित्य निर्भयाः पुनरागताः।। 169।।
हिन्दू-धर्म-विनाशाय धर्मान्तरण-तत्पराः।
तद्विलोक्य समुद्विग्नाः धर्मान्धाः यावना स्तदा।। 170।।
मेनिरे रामसा देवं धर्मान्तरण-बाधकम्।
विजेतुं स्वचमत्कारैः रुणीचा-रामसा प्रभुम्।। 171।।
आरबीयाः समाहूताः यावनैः पञ्चपूरुषाः।
समागतानां पञ्चानां यावनानां विधर्मिणाम्।। 172।।
रामसा स्वचमत्कारै र्व्यर्थदधाद् गर्व-मर्दनम्।
विवशाः यावनाः सिद्धाः पराभूताः सविस्मयाः।। 173।।

महासिद्धं महात्मानं तपोमूर्तिञ्च देवताम्।
नत्वा श्रीरामसादेवं यथाऽऽयातास्तथा गताः।। 174।।
हिन्दु-धर्मे हि शक्तास्ते न किञ्चिदपि भाषितुम्।
धर्म-संस्थापनञ्चैव सद्भक्त-रक्षणं तथा।
खलानां निग्रहं कृत्वा हिन्दू-धर्मं ररक्ष ह।। 175।।
अभिषिच्य सुतं ज्येष्ठं राजसिंहासने नृपः।
निरपेक्षो ह्यनासक्तो न्यवसद् राज-मन्दिरे।। 176।।
धर्मरक्षाकरो देवः समर्थो रामसा प्रभुः।
लीला-संवरणं कर्तुमैच्छद् देवो दयानिधिः।। 177।।
मातरं पितरं गत्वा प्रणम्य परिसान्त्वयन्।
विनीतो रामसा प्राह ईश्वरेच्छा बलीयसी।। 178।।
श्रूयतां मे वचस्तात ! मोहासक्तिहरं परम्।
भवतां भगवद्भक्त्या पूर्णाः सर्वे मनोरथाः।
सिद्धं मे सकलं लोके स्वावतार-प्रयोजनम्।। 179।।
राक्षसाः निहताः क्रूराः पापिनो नरभक्षिणः।
धर्मः संस्थापितो राज्ये साधवो रक्षिताः मयाः।। 180।।
धार्मिका भावुका भक्ता हरि-कीर्तन-तत्पराः।
यज्ञैः संकीर्तनैर्दानैर्यजन्तु निर्भयाः हरिम्।। 181।।
कामयेऽहं समाधिस्थो ध्यानयोगं समाश्रितः।
ब्रह्मलीनः प्रसन्नात्मा भवेयं शान्तमानसः।। 182।।
देवकीवसुदेवांशौ भवन्तौ भक्ति-भावितौ।
कलौ क्षात्रकुले जातौ पुण्यात्मानौ यशस्विनौ।। 183।।
जन्म कर्म-रहस्यं तद् वेदाहं वस्तपः फलम्।
भवन्तौ नैव जानीतो हरिमाया-विमोहितौ।। 184।।
अनन्यभक्ति-सम्पन्ना भक्त-लोक-सुखावहा।
स्थास्यति ते यशोगाथा यावच्चन्द्रदिवाकरौ।। 185।।
अहंताममतामायामोहासक्तिं भयावहाम्।
छित्त्वा ज्ञानासिना भक्त्या सन्तरेद् भवसागरम्।। 186।।
यो विप्रस्साधुसन्तानां सेवाकार्या सुत्वावहा।
एवं-एवं परो धर्मः कलौ श्रीकृष्ण-कीर्तनम्।। 187।।
हर हर महादेव! मन्त्रोऽयं धर्मरक्षकः।
सर्वैरुच्चैः समुद्घोष्यः सत्संगे कीर्तने सदा।। 188।।

निशम्य राजा परमार्थरूपां
सत्यां गिरं पुत्रमुखोद्गतां ताम्।
विधेर्विधानं भवितव्यताञ्च
मत्त्वादधौ धैर्यमुदासवृत्या।। 189।।
भक्तिज्ञानविरागाप्तां शोकमोहभयापहाम्।
श्रुत्वा श्रीरामसा-वाणीं राजा शान्तिमुपागतः।। 190।।
वात्सल्यरसभावाब्धौ निमग्नौ राजदम्पती।
वक्तुं न शेकतुः किञ्चित् साश्रुनेत्रौ सगद्गदौ।। 191।।
भावाविष्टौ हि संवीक्ष्य पितरौ रामसा ततः।
प्रणम्य निरगात्सद्यो भामिन्याः सौधमागतः।। 192।।
स्वभर्तुर्निश्चयं श्रुत्वा रामसा-सहधर्मिणी।
प्राञ्जलीरुदती प्राह नाथ! कोऽस्ति ममाश्रयः।। 193।।
कल्याणि! तेऽस्तु कल्याणं सुतस्ते भविताऽऽश्रयः।
सपुष्पे! धैर्यमातिष्ठ भक्त्या कृष्णं भजस्व माम्।।194।।
सुतस्ते विश्रुतो लोके भक्त्या शक्त्या भविष्यति।
स्थापयिष्यति मे नाम्ना ग्रामं वै रामदेवराम्।। 195।।
निशम्य भर्तुर्वचनं सुधीरा मुखाम्बुगं नेतलदे विलोक्य।
तेजोमयं तत्परमं मनोज्ञं भर्तुः स्वरूपं हृदि सन्दधार।।196।।
मातरं पितरञ्चैव भृत्यान् भक्तांश्च भामिनीम्।
सान्त्वयित्वोपदेशेन प्रतस्थे रामसा ततः।। 197।।
पात्रं रत्नमयं रम्यं पीतवस्त्रञ्च गेडियाम्।
श्रीफलं स्वकरे धृत्वा ध्यात्वा योगीश्वरं शिवम्।।198।।
रामसा योगसंविद्धो गत्वा रामसरोवरम्।
अभिवाद्य प्रजाः सर्वाः समाधौ प्रविवेश ह।। 199।।
योगेश्वरस्यांश-कलावतारः श्रीरामसा योगसमाधिसिद्धः।
कलेवरं योगरतो विजह्य दिव्यं वपुर्ब्रह्ममयं दधार।। 200।।
द्वापरे हि यथा कृष्णो देवकीवसुदेवयोः।
पश्यतो द्वारकाधीशः स्वधाम परमं ययौ।। 201।।
भक्तानां रामसादेवः सर्वदुःखहरः प्रभुः।
समर्थः सर्वव्यापी च पूज्यते लोकदेवता।। 202।।
विलोक्य रामदेवस्य लीला-संवरणं प्रभोः।
भक्ताश्च भावुकास्तत्र नाम-संकीर्तने रताः।। 203।।

देवभूमिरियं धन्या रुणीचा रामदेवरा।
रामसा पूज्यते यत्र द्वारकेश-कलाधरः।। 204।।
गृहेऽरण्ये जले भूमौ विवादे गगने रणे।
स्मरन् श्रीरामसा देवं नरो मुच्येत सङ्कटात्।। 205।।
न कोऽपि वक्तुं कविकोविदश्च
गाथां समर्थोऽजमलस्य भक्तेः।
श्रीद्वारकेशो वरदः प्रसन्नो
लेभे जनिं यस्य गृहे युगेऽस्मिन्।। 206।।
पुण्यात्माऽजमलो भूपो भक्त्या भुङ्क्त्वा सुखं त्विह।
श्रीकृष्णं संस्मरन्नन्ते तद्धाम परमं गतः।। 207।।
विश्रुता भक्ति-गाथैव कृष्ण-भक्तिप्रदायिनी।
गीयते श्रूयते लोकैः श्रद्धाविश्वासवर्द्धिनी।। 208।।
विक्रमाब्दे रसाम्बोधि शून्यद्विसंख्के शुभे।( वि.सं. 2076 )
वैशाखे शुक्लपक्षे च तृतीयायां तिथौ कुजे।। 209।।
सम्पूर्णा भक्तिगाथेयं देववाण्यामुदीरिता।
'भूरि' टीकायुता भव्या भक्तिशक्तिफलप्रदा।। 210।।
यः पठेत् श्रुणुयान्नित्यं भक्तिगाथामिमां नरः।
द्वारकेश-कृपादृष्ट्या तद्गृहे नित्यमङ्लम्।। 211।।
श्रीकृष्णद्वारकाधीश-भक्ति-भाव-परम्परा।
तत्कुले वर्द्धतेऽक्षुण्णा वंशवृद्धिश्च जायते।। 212।।
भक्तिगाथामधीत्यादौ यः पठेद् रामसा-स्तुतिम्।
तस्य संकल्पसिद्धिः स्याद् रामदेव-प्रसादतः।। 213।।
दिव्यं हरेर्नाम च जन्म दिव्यं
दिव्या च लीला पुरुषोत्तमस्य।
स्वभक्त-भक्त्या प्रपुनाति विश्वं
श्रीद्वारकेशो वरदः प्रसन्नः।। 214।।

''ऊँ जय जय पं. श्रीमाली रामात्मज नथमलशास्त्री दाधीच विरचिता- भक्त श्री अजमल-भरक्ति गाथा सम्पूर्णा''

ऊँ श्रीकृष्णार्पणमस्तु

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )
Mob.: 9351226660

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# नाट्यविमर्शशोधपत्रसङ्ग्रहः

संस्कृतभाषायां नाट्यसाहित्यस्य सुविशाल-भाण्डागारोपलब्धिः सुविदिताऽस्ति। भरतस्य नाट्य-शास्त्रं सुविदितम्, तत्प्रेरितानि लक्षशो रूपकाणि, उपरूपकाणि व्यलेख्यन्त सुधीभिः। तेषां मञ्चप्रस्तुतेरपि विशाल इतिहासः। आधुनिके युगे नाट्यकलाया नूतना विधाः सुतरां लोकप्रियाः संवृत्ता यासु चलचित्रणि, आकाशवाणीरूपकाणि, दूरदर्शन-धारावाहिकानि च सुविदितान्येव।

भारतीयस्यास्य नाट्यसाहित्यस्य विवेचनाय जयपुरस्थेन महाराज संस्कृतकालेजेन विश्वविद्यालय अनुदान आयोगस्य साहाय्येन त्रिदिवसीया राष्ट्रीय विद्वद्गोष्ठी या समायोज्यत तस्यां विविधैर्मनीषिभिः शोधार्थिभिश्च नाट्यशास्त्रं नाट्यसाहित्यं चावलम्ब्य बहूनि शोधपत्राणि प्रास्तूयन्त। तादृशानां पादोनशत संख्याकानां (74) शोधपत्राणां संकलनं सपद्येव प्रकाशितमस्ति यस्मिन् भरतनाट्यशास्त्रोपरि, संस्कृतनाटकसाहित्योपरि, चलचित्रदूरदर्शनादीना-मुपरि च एकादशशोधपत्राणि संस्कृते, 59 एकोनषष्टि शोधपत्राणि हिन्द्यां, चत्वारि शोधपत्राणि चाङ्गल-भाषायां मुद्रितानि।

एतेषु नाट्यसाहित्यस्य विशदं विवेचनमुपलभ्यते, अतः शोधार्थिनां कृते, सामान्यपाठकानां चापि मार्गदर्शनाय संग्रहणीयमिदं शोधपत्रसंकलनम्।

**भारतीय नाट्यशास्त्र एवं वर्तमान दृश्यकाव्य प्रधानसम्पादक प्रो. भास्कर शर्मा श्रोत्रिय, प्रकाशक राष्ट्रीय संस्कृतसाहित्य केन्द्र, 222 सरस्वती सदन, बिहारी जी की गली, सोंखियों का रास्ता, किशनपोल बाजार, जयपुर, पृ.सं. 416, मू. 995/-.**

## ईतिभीतीनां ज्योतिषीयविश्लेषणम्

प्राचीनकाले यथा ईतयो भीतयश्चाऽभूवन् तथा वर्तमानकालेऽपि भूकम्प-जलप्लावनादयो विपत्तयः समनुभूयन्ते देशे विदेशेषु च। आधुनिकपारिभाषिक-संज्ञानुसारं तादृश्यो विपत्तयः ''आपदाः'' इत्युच्यन्ते, तासां निवारणाय ''आपदा प्रबन्धनं'' विधीयते। भारतस्य उत्तराञ्चले जलपूरादीनां, भूकम्पादीनामन्यासां च विपदां प्रभावो यदा भवति तदा तत्र ज्योतिषीयानि कारणान्यपि भवेयुरेव। तादृशानां कारणानां विवेचनं डॉ. प्रदीपकुमार सेमवालनामकेन शोधविदुषा शोधग्रन्थे एकस्मिन् कृतमभूत्। उत्तराखण्डस्थस्य लेखकस्यास्य शोध-ग्रन्थोऽयं जयपुरात् प्रकाशितोऽस्ति यत्र पञ्च-स्वध्यायेषु भूकम्पेन्द्रधनुषोल्कापातादिषु ज्योतिषीय-कारणानि, ग्रहनक्षत्रादीनां प्रभावो विमृष्टोऽस्ति।

**उत्तराञ्चलीयापदां ज्योतिषीयविश्लेषणम् ले. डॉ. प्रदीपकुमार सेमवाल, प्रकाशक राष्ट्रीय संस्कृत-साहित्य केन्द्र 222 सरस्वती सदन, बिहारी जी की गली, सोंखियों का रास्ता, किशनपोल बाजार, जयपुर, पृ.सं. 190, मू. 500/-.**

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

## गुरुमहाभागानामद्भुतं मानसिकं स्थैर्यम्

अस्यामग्निपरीक्षायां निष्कलङ्कमुत्तीर्य बहिरागतं संघं प्रति तावदवरुद्धायां जनादरभावनायामकस्माद् विस्फोट इवाभवत्। गुरुमहाभागानां देहल्यां सम्पन्ने एकस्मिन् स्वागतसमारोहे प्रचण्डमेकत्रितं जनसम्मर्दमवलोक्य बी.बी. सीतिसमाचारप्रसारकेण कथितं ''श्रीगुरुमहाभागाः भारतीये क्षितिजे उदिताः देदीप्यमानास्तारका इव सन्ति। एतादृशं प्रचण्डं जनसमूहमाकृष्टं कर्त्तुं नेहरूमहोदयातिरिक्तं कोऽपि नास्ति।'' श्री गुरुमहाभागानामिदं भारतभ्रमणं 1949 वर्षस्यागस्तमासादारभ्य 1950 वर्षस्य जनवरीमासपर्यन्तं प्रचलितम्। अगस्तमासे विंशतितमदिनाङ्कात्पूर्वं श्री पटेलमहोदयानामस्वस्थतायाः समाचारं प्राप्य तैः सह मिलितुं गुरवः मुम्बई नगरे गताः। अस्मिन् मिलने पटेलमहोदयैः ईशुधर्मानुयायिनां वर्द्धमानां गतिं प्रति चिन्तां कुर्वद्भिः हिन्दूनां पाचनशक्तिं वर्द्धयितुं बलं दातुं कथितम्। पाकस्थाननिर्माणानन्तरमुत्पन्नानां समस्यानां चर्चां कुर्वद्भिः कथितं गतं विस्मृत्याधुना देशस्य भविष्यविषयेऽवधेयम्।

समस्तेऽपि देशे गुरुमहाभागानामुत्साहपूर्णानां स्वागतसमारोहाणां यात्रा प्रचलितासीत्। तद्विपरीतं दृश्यं तेषां कोल्हापुरसांगलीयात्रायामासीत्। संघविरुद्धं विरोधभावनावतामुपद्रवकारिणां शतशः संख्यायां जनाः मार्गस्योभयपार्श्वयोः क्षेत्रेषु निलीना आसन्। श्रीमतां गुरुमहाभागानां यानं यदा ततो गच्छेदकस्मादाक्रमणं कृत्वा तेषां हत्यां करिष्याम इति भयङ्करो विचार आसीत् परं गुरुमहाभागानां यानं यदा तत्रागतमतिद्रुतगत्या ततो निस्सृतं ननु पूर्वं ज्ञानं स्यात्। इदमवलोक्य सर्वे उपद्रवकारिणो व्याकुलीभूयेतस्ततः प्रकीर्णाः। गुरुमहाभागानां यानं सुरक्षितं पारे गतम्। एतादृशे आतङ्कपूर्णे प्रसङ्गेऽपि गुरवः शान्तमूर्तिरिवासन्।

## समाजरूपिणा भगवता परीक्षणम्

अस्याः घटनायाः उल्लेखं कुर्वद्भिर्गुरुमहाभागैरेकस्यां पत्रिकायां प्रदत्ते स्वलेखे कथितम्-यथा भगवान् स्वभक्तानां संकटे आनन्देऽपि च परीक्षणं करोति, उभयथा परीक्षणे चोत्तीर्णतायां प्रसीदति तथैव समाजरूपिणा भगवता परीक्षणं कृतम्, तथैव च प्रसन्नो भूत्वाऽस्मभ्यमाशीर्वादमेव दास्यति। एवमेव च समभवत्। कतिपयवर्षानन्तरमेव गुरुमहाभागानां तस्मिन्नेव कोल्हापुरसांगलीक्षेत्रप्रवाससमये पूर्वमुपलवृष्टिकर्त्तार एव पुष्पवृष्टिं कर्त्तुमग्रे समागताः। परन्त्वेतादृशे अभूतपूर्वप्रसङ्गेऽपि स्वयंसेवकेभ्यो जनतायै च यदाह्वानं कृतं तदभूतपूर्वमेव समाजे समन्वयार्थं यदपि कटुवृत्तं सर्वं विस्मरणीयम्। भोजनं कुर्वद्भिर्यदि दन्तैर्जिह्वाच्छेदो भवेद्दन्तोत्पाटनं नैव क्रियत इति।

सारांशेनैकतः आतङ्कस्य दमनस्य च मध्ये स्थिरशिलाखण्ड इव स्थित्या मनसः स्थैर्यं धारयद्भिस्तत्काण्डसमाप्तौ स्वपक्षविजयोत्सवेऽपि मानसिक स्थैर्यं संयमश्च तैः प्रदर्शितः। उभयप्रसङ्गेऽपि राष्ट्रहितमेव तेषां दृष्टावासीत्। एतादृशीषु परस्परविपरीता-स्वग्निपरीक्षासु राष्ट्रहितस्याद्वितीयमुदाहरणं प्रस्तुतवन्तः सत्यमेव राष्ट्रनेतारः श्रीमन्तो गुरुमहाभागाः आसन्।

### कश्मीरप्रान्तस्य सुरक्षायां सहयोगः

राष्ट्रनायकरूपे श्रीगुरुमहाभागानां राष्ट्रस्य सुरक्षायां तस्य हितसंवर्द्धने चातीव जागृता भूमिकासीत्। देशस्य विभाजने जाते एव 1947 ई. वर्षस्याक्टूबरमासस्य तृतीये सप्ताहे पाकस्थानेन कश्मीरप्रान्ते स्वसेना प्रवेशिता या भारतीयसेनायां वर्त्तमानामाङ्ग्लोच्चाधिकारिणां प्रत्यक्ष-सहयोगेन कश्मीरप्रान्तं हस्तगतं कर्तुमग्रे वर्द्धमानैवासीत्। तत्रस्थजनेषु घोरा अत्याचाराः जायमाना आसन्। पाकसैन्यं कश्मीरभूमौ स्वाधिकारं चकार। दौर्भाग्ये-नैतादृशे आसन्नसंकटसमये कश्मीरप्रान्तं भारते विलीनं कर्त्तुं बहुविधशङ्काकुशङ्काग्रस्तं कश्मीरभूपतेर्मनः विचलितमासीत्। एतादृशेऽवसरे वल्लभभाईपटेलमहोदयं भासते-स्म यन्महाराजस्य मनोऽनुकूलयितुं गुरव एव समर्थाः। अत एव गुरुमहाभागास्तत्र प्रेषिताः।

कश्मीरमहाराजो हरिसिंहो राज्ञी श्रीमती तारा च कश्मीर निर्मितमूर्णावरणमुपहृत्य तेषां स्वागतं चक्रतुः। श्रीगुरुमहाभागाः 1947 वर्षे अक्टूबरमासस्याष्टादशे दिने कश्मीरमहाराजेन सम्मिल्य सर्वशंकाकुशङ्कामुक्तं विधाय स्वं राज्यं भारते विलीनं कर्त्तुं तान् सज्जीकृतवन्तः। तदनन्तरमेव भारतीयं सैन्यं तत्र प्रेषितम्। भारतीयसैन्येन पाकसैन्यं मर्दयता स्वभूमिर्हस्तगता कृता परं पूर्णभागस्य मुक्तेः पूर्वमेव नेहरूमहोदयैः युद्धविरामस्य घोषणा कृता। कश्मीरप्रान्तस्य महत्त्वपूर्ण एको भागः पाकाधिकारे त्यक्तः। तत्पश्चात् यदा सर्वकारेण राष्ट्रसंघे पाकाक्रमणस्य घटना प्रस्तुता तदापि गुरुमहाभागैः कथितम्-सर्वथा निर्णयोऽयमात्मघाती। राष्ट्रसंघोऽप्यस्मद्विरुद्धमेव निर्णेष्यति। न न्याय्यं कथयिष्यति। तदेव जातम्। अधुनापि स भागः पाकाधिकारेऽस्ति। यस्मात्स उग्रवादिभिरघोषितं युद्धं करोति।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** | **नवसप्ततितमः प्रसङ्गः**

# शक्तेर्महत्त्वम्

❑ **श्रीमती आराधना धर्माधिकारी**

एकदा शंकराचार्याः स्वशिष्यैस्सह कुत्रापि गच्छन्तिस्म। मार्गे बालिकैका स्वपुरुषस्य शवं पुरस्संस्थाप्योप-विष्टासीत्। शङ्कराचार्येण कथितम्-बाले! शवमेकतः कुरु, येन वयं गच्छेम। सा अवदत्-भवन्त एव तं कथयन्तु मार्गं देहीति। स मार्गं दास्यति। शङ्कराचार्येण कथितं स तु शवः कथं स्वयमुत्थास्यति। सा अवदत्-अद्वैतवादिनो भवन्तः, ''सर्वं ब्रह्ममयं जगत्'' किमिति नोत्थास्यति। शङ्कराचार्येण साष्टाङ्गं प्रणामः कृतः। देवि कियत्या सरलतया त्वयावबोधितम्, शक्तिं विना न किमपि कर्त्तुं शक्यते। वस्तुतस्तु शक्तिरेव परं ब्रह्माव्यक्तं नाम। प्रकृतिपुरुषौ तस्या एव रूपद्वयम्। तेनाद्वैतवादोऽपि सिद्ध्यति। अत एव च मार्कण्डेय-पुराणेऽप्युक्तम्- ''एकैवाहं जगत्यत्र द्वितीया का ममापरा'' शक्तिरेवैकोऽहं बहुस्यामिति बहुरूपिणी सृष्टिर्जायते।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी लघुकथा

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## सिंहस्य पुनरुज्जीवकाः चत्वारो भ्रातरः

कुसुमपुरनामकं नगरमस्ति। तत्र धरणीवराह-नामको भूपतिरासीत्। तस्य विप्रबहुले राज्ये एको विष्णुस्वामिनामकः कोऽपि द्विजः प्रतिवसति स्म। तस्य स्वाहा नाम्नी भार्या आसीत्, तस्यां तस्य विष्णुस्वामिनामा द्विजस्य चत्वारः सुताः बभूवूः। ते च कालक्रमेण पितरि स्वर्गते सति ज्ञातिभिर्हृतसर्वस्वा परस्परं मन्त्रयाञ्चक्रुः - ''इह अस्माकं गतिर्नास्ति, तदन्यत्र वयं गच्छामः'' इति मन्त्रयित्वा यज्ञ-स्थलाभिधे ग्रामे मातामहाऽऽवासं जग्मुः। तत्र मातामहाभावात् मातुलैः सुसत्कृताः स्वाध्याय-तत्परास्तस्थुः।

कालक्रमेण निर्धनाः ते चत्वारो भ्रातरः अन्नवस्त्रादिषु मातुलानामवज्ञाभाजनतां जग्मुः। ततः आत्मीयजनैः हतापमानेन दुःखितानां तेषां ज्येष्ठः एकान्ते स्वभ्रातॄनब्रवीत्, 'भ्रातरः! किं क्रियते? सर्वे वयं आत्मीयजनैः कृतमिदमपमानं पदे-पदे अवधारयामः। अस्माभिरस्मिन् विषये किमपि कर्तुं' न शक्यम्। अहं हि उद्वेगेन भ्राम्यन् वनं प्राप्तोऽद्य भुवि पतितमेकं मृतपुरुषमद्राक्षम्। तस्य शवस्य विषये चिन्तयता मया तां गतिं प्राप्तुं चिन्तितम्, विचारितं मया यत् 'अयं हि धन्यः यः दुःखभारं विमुच्य स्थितः' इति संचिन्त्य तत्कालं मरणनिश्चयं कृत्वा तरुशाखावलम्बिना पाशेन आत्मानमाबद्धयत्। चेतनाविहीनस्य मे स पाशः त्रुटितोऽभूत्। महीतले पतितोऽहं लब्धचेतनः यदा च त्रुटितपाशमपश्यम् तदा मया ज्ञातं यत् कथमहं आत्मघातकृत्यान्मुक्तोऽभूवम्। तत्रागतेनैकेन कृपालुना पुंसा पटमारुतेनाश्वास्य लब्धसंज्ञः सोऽब्रवीत्-सखे! कथय, विद्वानपि कं प्रति एवं खिद्यसे? सुकृती सुखमाप्नोति दुष्कृती दुष्कृतादेव दुःखमाप्नोति। सुकृतमाचर, आत्मघात-सदृशाद् दुष्कृतात् किमर्थं नरकभोगदुःखं वाञ्छसि? इत्युक्त्वा मां समाश्वास्य स पुमान् स्वगन्तव्यं प्रति गतः। अहञ्च तादृशं नरकभोगकारकं मरणोद्यमं त्यक्त्वा इहाऽऽगतः। अनेन घटनाक्रमेण मया ज्ञातं यद्यदि विधिरनुकूलो नास्ति चेत् मरणमपि न लभ्यते। इदानीं तपसा तीर्थे स्वशरीरं वाहयामि येन जन्मान्तरेऽहम् निर्धनतादुःखभागी न स्याम्।

इत्युक्तवन्तं तं ज्येष्ठं कनिष्ठा भ्रातरः प्राब्रुवन् - ''आर्य्य! अर्थं विना पण्डितजनोऽपि दुःखेन बाध्यते। वयं पश्यामः यदर्थानां शरदकालिकमेघ-वच्चञ्चला गतिः। कथमपि समुपार्ज्य सोऽर्थः रक्ष्यमाणोऽपि यथा असन्मित्रं, वेश्या तथैव श्रीश्च कस्यापि जनस्य कदापि स्थिरा न भवन्ति। अतः उद्योगिना मनस्विना च कोऽपि गुण उपार्जनीयः येन हठात् बद्धो अर्थहरिणः सुखपूर्वकं रक्षणीयः स्यात्। एवं स्वभ्रातृभिरुक्तो ज्येष्ठः किञ्चिद्धैर्यमवलम्ब्य उवाच, कोऽसौ गुणः योऽर्जनीयः स्यात्?'', ततः सर्वे विचिन्त्य परस्परं वदन्ति स्म यत् किमपि विज्ञानं वयं शिक्षामहे। एवं निश्चित्य ते सर्वे प्रत्यावर्त्य परस्पर-मेलनसङ्केतस्थानं निश्चित्य एकैकशः ते चत्वारो भ्रातरः चतुर्षु दिक्षु प्रययुः।

अथ गच्छति काले सर्वे चत्वारो भ्रातरः सङ्केतस्थले आगत्य मिलिताः। ''केन किं

**शिक्षितम्?'' इति प्रत्येकं अन्योऽन्यमपृच्छत्। एषामेकोऽब्रवीत्।''मया ईदृशं विज्ञानं शिक्षितं येन यस्य कस्यचिदपि प्राणिनः अस्थिपञ्जरं प्राप्य तस्मिन् तदुचितानि मांसानि उत्पादयामि।'' एतदाकर्ण्य तेषु द्वितीयोऽवदत्, 'मया ईदृशं विज्ञानमधिगतम्, येन अस्मिन् प्राणिनि उत्पन्नानि त्वङ्मांसलोमानि सन्ति तस्यावयवेषु चक्षुरादीनीन्द्रियाणि स्रष्टुं जाने। चतुर्थोऽब्रवीत्,' ''अहं उत्पन्नावयवं अस्थिपञ्जरं प्राणैर्युक्तं कर्तुं शक्नोमि।''**

**एवं ते परस्परमुक्त्वा विज्ञानपरीक्षणाय चत्वारोऽपि अस्थिपञ्जरमन्वेषयितुं वनमध्ये ययुः। विधिवशाच्च ते तत्र सिहंस्य अस्थिपञ्जरं प्रापुः। प्रथमस्तत्समुचितैर्मांसैस्तदस्थिपञ्जरमयोजयत्। द्वितीयस्तस्य त्वचो लोमानि च उदपाटयत्। तृतीयोऽपि प्राणशून्यं सिंहशरीरं समग्रैरिन्द्रियैर्युक्त-मकरोत्। चतुर्थस्तु यदा तस्य चेतनाविहीनस्य सिंहशरीरस्य मध्ये जीवितमदात्, तदा सञ्जातजटा-भारोऽतिभयङ्करः दंष्ट्राकरालदहनः तीक्ष्णनखाङ्-कुशः मृगेन्द्रः सिंहः सचेतनोऽभूत्, स च सिंहः क्षुधार्तः स्वसम्मुखे मनुष्यान् विलोक्य स्वोत्पादकान् तान् सर्वानपि चतुरो भ्रातॄनुत्थायाक्रम्य चाभक्षयत्, तत्क्षणमेवारण्यमध्ये प्रविष्टो बभूव।**

**एवं ते द्विजपुत्राः सिंहनिर्माणदोषात् सर्व एव विनाशं गताः। दुष्टं सिंहसदृशजन्तुमुत्थाप्य कस्य जनस्य सुखं भवति इति।**

## हिन्दी

## सिंह को पुनः जिलानेवाले चार भाई

कुसुमपुर नाम का नगर है। वहां धरणीवराह नामक राजा था। उसके ब्राह्मणबहुल राज्य में एक विष्णु स्वामी नामक कोई द्विज रहता था। उसके स्वाहा नाम की भार्या थी। उससे विष्णुस्वामी नामके द्विज के चार पुत्र हुए, और वे समय की गति के कारण पिता के स्वर्गवासी होने पर जाति के लोगों द्वारा सारी धन सम्पत्ति हरण कर लेने पर(उनसे) परस्पर मन्त्रणा की, ''यहां हमारा गांव नहीं है, अत्यन्त्र ही हम जावें'' यह मन्त्रणा करके (वे) 'यज्ञस्थल' इस नाम के ग्राम में नाना के घर गए। वहां नाना के अभाव में मामा के द्वारा अच्छी प्रकार से सत्कार किए जाकर वे स्वाध्याय में तत्पर होकर रहने लगे।

काल की गति से निर्धन वे चारों भाई अन्न वस्त्रादि में मामाओं के द्वारा अवज्ञा अनुभव करने लगे। इसके पश्चात् आत्मीय जनों द्वारा अपमान से दु:खित उनके सबसे बड़े भाई ने एकान्त में अपने भाईयों को कहा।''भाइयों! क्या करें ? हम सब आत्मीयजनों द्वारा किए हुए इस अपमान को पद-पद पर धारण कर रहे हैं। हम सब इस विषय में कुछ भी करने को समर्थ नहीं है। मैं उद्वेग के द्वारा घुमाया गया आज जंगल में गया तो भूमि पर पड़े एक मृत पुरुष को देखा। उस शव के विषय में चिन्तन करते हुए मैंने उसकी गति को प्राप्त करने की चिन्ता की। मैंने विचार किया कि''यह ही धन्य है जो दु:ख के भार को त्याग कर पड़ा है। यह सोच कर मैंने उस समय मरने का निश्चय किया और वृक्ष की शाखा में लटके फंदे से अपने आपको बांध लिया। चेतना शून्य होने पर मेरा वह पाश टूट गया। पृथ्वी पर गिरने पर मेरी जब चेतना जगी और जब टूटे फंदे को देखा तो मैंने जाना कि कैसे मैं आत्मघात के कृत्य से छूट गया। वहां आए हुए एक कृपालु व्यक्ति ने वस्त्रों की हवा से मुझे आराम देकर सचेतन हुए मुझ को कहा, ''मित्र कहो! विद्वान् होकर भी किस के प्रति खिन्न हुए हो? अच्छे कर्म करने वाला सुख प्राप्त करता है और पापी

दुष्कृत्य के कारण ही दु:ख प्राप्त करता है। अच्छा कर्म करो, आत्मघात जैसे दुष्कृत्य से किस लिये नरक दिलाने वाले दु:ख की चाहना करते हो'' यह कहकर मुझ को आश्वासन देकर वह मनुष्य अपने गन्तव्य की ओर चला गया। इस घटना क्रम से मैंने जाना कि अगर विधि अनुकूल नहीं है तो मृत्यु भी नहीं आती। अब तपश्चर्या करके तीर्थ स्थान पर अपने शरीर को जलाऊंगा जिससे जन्मान्तर में भी निर्धनता का दु:ख भागी न होऊँ।''

इस प्रकार कहते हुए उस बड़े भाई को छोटे भाई बोले, ''आर्य्य ! अर्थ (धन) के बिना पण्डित लोग भी दु:खी होते हैं। हम देखते हैं कि अर्थ की शरद्काल में मेघ की सी चंचल गति होती है। किसी तरह से यह धन उपार्जित किया हुआ भी और उसकी रक्षा किए जाने पर भी कुमित्र, वेश्या और लक्ष्मी की तरह किसी भी व्यक्ति के पास यह स्थिर होकर नहीं रहता। इसलिये उद्योगी और मनस्वी लोगों को कोई भी गुण सीखना चाहिये। जिससे हठात् पकड़ा हुआ अर्थरूपी हरिण सुखपूर्वक रक्षणीय हो सके।'' इस प्रकार अपने भाइयों द्वारा कहा गया वह ज्येष्ठ भ्राता किञ्चित् धैर्य का अवलम्बन करके बोला, ''वह कौनसा गुण है जिसको सीखा जाय?'' इस पर सबने विचार करके एक-दूसरे से कहा, 'कोई विज्ञान हम सीखें' इस प्रकार विचार करके वे सब लौटकर आने पर परस्पर मिलने का संकेत स्थान निश्चित करके एक एक करके चारों भाई चारों दिशाओं में चले गए।

इसके पश्चात् कुछ समय बीत जाने पर सभी चारों भाई सङ्केत किए स्थान पर आकर मिले। ''किसने क्या सीखा?'' यह प्रत्येक एक दूसरे को पूछने लगा। इनमें एक बोला, ''मैंने ऐसा विज्ञान सीखा है जिससे जिस किसी भी प्राणी के अस्थिपञ्जर के प्राप्त होने पर उस पर उसके योग्य मांस उत्पन्न कर देता हूँ।'' यह सुनकर दूसरा बोला, ''मैंने वैसा विज्ञान सीखा है जिससे मांस उत्पन्न हुए अस्थिपञ्जर में उस प्राणी में होने वाला चमड़ा और उसके बाल पैदा कर सकता हूँ।'' तीसरा बोला, ''मैंने ऐसा विज्ञान सीखा है जिससे, जिस प्राणी में मांस, चर्म और केश उत्पन्न हो गए हों ऐसे उसके अवयवो में नेत्र आदि इन्द्रियों की सृष्टि करना जानता हूं।'' चौथा बोला, ''मैं अवयव वाले अस्थि पञ्जर को प्राणों से युक्त कर सकता हूँ।''

इस प्रकार परस्पर बातचीत करके वे सब चारों विज्ञान की परीक्षा के लिये अस्थिपञ्जर को खोजने को जंगल में गए। दैवयोग से उन्होंने वहां सिंह के अस्थिपञ्जर को देखा। पहले व्यक्ति ने उसके योग्य मांस से युक्त उस अस्थिपञ्जर को कर दिया। दूसरे ने उसके चर्म और बाल उत्पन्न कर दिए। तीसरे ने भी प्राणशून्य सिंह के शरीर को सम्पूर्ण इन्द्रियों से युक्त कर दिया। चौथे ने तो जब उस चेतना विहीन सिंह के शरीर में जीवन दिया तो उत्पन्न हुए है जटाभार जिसके ऐसा अत्यन्त भयंकर लम्बे-लम्बे दांतों वाले मुखवाला, तथा लम्बे नखरूपी अंकुशवाला मृगेन्द्र सिंह चेतना युक्त हो गया, और वह भूखा सिंह अपने सम्मुख मनुष्यों को देख कर स्वयं को उत्पन्न करने वाले उन सभी चारों भाइयों को खड़ा होकर तथा आक्रमण करके खा गया और उसी क्षण जंगल में घुस गया।

इस प्रकार वे ब्राह्मणपुत्र सिंह के निर्माण के दोष के कारण सभी विनष्ट हो गए। दुष्ट हिंस्रप्राणी को खड़ा करने पर कौन मनुष्य सुख को प्राप्त होता है ?

**किशनपोल बाजार:, जयपुरम्**

नारी-स्तम्भः

# वनसंरक्षिका-वासु

❑ डॉ. राजेश्वरी भट्ट

वनानि मानवेभ्यः प्रकृतिप्रदत्तान्यलङ्करणानि सन्ति। जीवनरक्षायै वनान्यनिवार्याणि विद्यन्ते। प्रकृत्याः सन्तुलनं स्थापयितुं वनानां महती भूमिका वर्तते। राष्ट्रस्य सांस्कृतिक-सामाजिक-आर्थिक विकासेष्वपि वनानां महत्त्वं अधिकतरं वर्तते। को न जानाति यत् विश्ववन्द्यमानयोः भगवतो रामकृष्णयोः दिव्यं चरित्रं वनेष्वेव विकसितं विलसितञ्च जातम्। वनान्येव अस्माकं त्रिकालदर्शिनां महर्षीणां तपोभूमयः सन्ति। वनेषु जाता वृक्षास्तेषां मूलानि पत्राणि फलानि च असाध्यरोगेभ्यो रक्षन्ति। असंख्य-निरीह-पशुपक्षिणां कृते वनानि शरण्यानि सन्ति। जीवनस्य कृते लाभप्रदः प्राणवायुः (ऑक्सीजन) वन्येभ्यो वृक्षेभ्यः प्राप्यते। अस्माकं ऋतुचक्रं वनान्येव नियमयन्ति। नूनं कल्पवृक्षवत् फलदाय-कानां वनानां सततमुच्छेदनं महत्पापं राष्ट्रस्य कृते भयावहं वर्तते। वनानां विनाशेन शनैः शनैः मानवानां विनाशो विनिश्चितो विद्यते। अस्माद् भयाद् राष्ट्रं निवारयितुं 1894 तमे वर्षे सर्वेकारेण वन अधिनियमः पारितः। तदनन्तरं पुनः 1952 तमे वर्षे अस्मिन् नियमे संशोधनं कृतम्। नियमस्यास्योद्देश्यं वनानां संरक्षणं समुचितविकासश्चासीत्। किन्तु आत्मघातिनो मानवा नियममिमं मञ्जूषायां निक्षिप्य वनानामुन्मूलने निर्बाधगत्या प्रवृत्ता दृश्यन्ते। सम्प्रति वनानामुन्मूलने सततं सन्नद्धानां दुष्टानां दुश्चेष्टा-मवरोद्धुं भारतीय वन सेवाया (I.F.S.) महिलाऽधिकारी वासु कनोजिया भयस्य पर्यायभूता जाता। भयातीता अयोध्यानगर्या मूलनिवासिनी 33 वर्षीया 'वासु कनोजिया' वृक्षोच्छेदनाय कुठार-हस्तानां कुकर्मिणां कृते भयमुत्पाद्य तेषां दुष्प्रयत्नं विफलं कर्त्तुं दृढ़-संकल्पवती दृश्यते। निष्ठावती वनाधिकारिणी 'वासु' आत्मनः कर्त्तव्यमार्गे अभिमुखमागतानां दुष्टानां कुचक्रैः मनागपि विचलिता न भवति। एतत्कृते निष्पक्षनिर्णयेन बद्धा वनसंरक्षिका 'वासु' बलाद् वनभूमिहारिभिः दुष्टैः वारं वारं आहता जाता। एवं गतेऽपि वृक्षोच्छेदने संलग्नानां दुष्टानां पक्षोच्छेदने प्रवीणा 'वासु-कनोजिया' कर्तव्यमार्गे अग्रसराऽस्ति। दृढ़संकल्पेन आत्मनिष्ठया च विरोधिनां अक्ष्णोः कण्टकिनी 'वासु कनोजिया' स्थानान्तरण-व्याजेन वारं वारं कन्दुकमिव अत्र तत्र प्रेषिता। इदानीं मध्यप्रदेशे टाइगर रिजर्व स्थाने स्थिता 'वनसंरक्षिका-वासु' प्रदेशस्यास्य 265 हेक्टेयरभूमिं अतिक्रमण-कारिभ्यः मुक्तां कारितवती। एवमेव लवकुशनगरे वनभूमिं अतिक्रमणकारिभ्यः पुनः गृहीत्वा तत्र हरीतिम्नः प्रसारं कारितवती। अस्मिन् क्रमे भुवोपहारिभिः सामादिभिरुपायैः निष्ठावतीं महिलाधिकारिणीं वासुकनोजियां अनुकूलयितुं प्रयतितम् किन्तु धन्यास्ति सत्पथगामिनी महिलावनाधिकारी वासु कनोजिया या सन्मार्गे अग्रेसरा वर्तते। वासु कनोजियायाः कर्मनिष्ठता, दृढसंकल्पता, निःस्वार्थतादिभिगुणैः तस्याः कर्म-चारिणोऽपि सुपरिचिताः सावहिताश्च सन्ति। वन संरक्षायै समर्पितायाः प्रयासोऽयं प्रेरणीयो वर्तते।

## हिन्दी

वन मानवों के लिए प्रकृति पदत्त अलंकार है। जीवन की रक्षा के लिए वन अनिवार्य हैं। प्रकृति का सन्तुलन बनाए रखने में वनों की भूमिका महत्वपूर्ण है। राष्ट्र के सांस्कृतिक-सामाजिक एवं आर्थिक विकास में वनों का अत्यन्त महत्व स्पष्ट है। कौन नहीं जानता कि विश्व में वन्दनीय भगवान राम एवं कृष्ण का दिव्य चरित्र वन में ही विकसित एवं विलसित हुआ। वन ही हमारे त्रिकालदर्शी ऋषियों की तपोभूमि है। वन के वृक्ष, उनकी जड़-पत्ते एवं फल असाध्य रोगों से मानव की रक्षा करते है। वन असंख्य पशुपक्षियों की शरणस्थली है। मानव जीवन के लिए अत्यन्त लाभदायक प्राणवायु (ऑक्सीजन) वन वृक्षो से ही प्राप्त होती है। हमारे ऋतुचक्र में नियामक वन ही हैं। कल्पवृक्ष के समान फलदायक इन वृक्षों का सतत् उच्छेदन राष्ट्र के लिए भयावह है। वनों के विनाश से मानवता का विनाश निश्चित है। इस महान् भय से राष्ट्र को बचाने के लिए 1894 ई में सरकार के द्वारा ''वन अधिनियम'' पारित किया गया। इसके पश्चात् पुन: 1952 ई. में इस अधिनियम में संशोधन किया गया। जिसका उद्देश्य वनों का संरक्षण एवं समुचित विकास है किन्तु आत्मघाती मानव इन नियमों को ताक में रखकर वनो के उच्छेदन में सतत् सन्नद्ध है। हर्ष का विषय है कि वनों का विनाश करने में सतत् संलग्न दुष्टों की दुष्चेष्टा को रोकने के लिए भारतीय वनसेवा (I.F.S.) की महिला अधिकारी वासु कनोजिया भय का पर्याय बन गई है। भयातीता, अयोध्या नगरी की मूल निवासिनी 33 वर्षीया वासु कनोजिया वृक्षो को काटने के लिए उद्यत कुल्हाड़ी हाथ में लिए दुष्टों को भयभीत कर उनके दुष्प्रयत्नों को विफल करने के लिए कृत संकल्प है। निष्ठावती वनाधिकारिणी वासु अपने कर्त्तव्य मार्ग में सामने आने वाले दुष्टों के द्वारा रचित कुचक्रो से तनिक भी विचलित नहीं होती है। निष्पक्ष निर्णय को आश्रय लेकर कार्य करने वाली वन रक्षिका 'वासु' वन भूमि का अतिक्रमण करने वाले दुष्टों के द्वारा अनेक बार पीड़ित हुई है किन्तु वृक्षों के काटने से लगे हुए दुष्टों के पंख काटने में प्रवीणा 'वासु' कर्तव्य मार्ग पर अग्रसर हैं। दृढ़संकल्प एवं कर्मनिष्ठा से विरोधियों की आँखों में काँटे की भांति चुभने वासु कनोजिया स्थानान्तरण के बहाने से गेंद की भांति इधर-उधर फेंक दी जाती है। वर्तमान में मध्यप्रदेश में 'टाइगर रिजर्व' स्थान पर स्थित 'वनरक्षिका वासु' ने इस प्रदेश की 265 हेक्टेयर भूमि को अतिक्रमणकारियों के जाल से मुक्त करवाया। इसी प्रकार लवकुश नगर में वन की भूमि को अतिक्रमणकारियों से पुन: ग्रहण कर वहाँ हरियाली का प्रसार किया इस क्रम में भूमि का अतिक्रमण करने वाले दुष्टों ने साम दाम आदि अनेक उपायों से संरक्षिका वासु कनोजिया को अनुकूल करने का प्रयत्न किया, किन्तु धन्य है, सन्मार्ग पर चलने वाली महिला वनाधिकारी 'वासु' जो निरन्तर सन्मार्ग पर अग्रेसर है। 'वासु कनोजिया' की कर्मनिष्ठा, दृढसंकल्प एवं नि:स्वार्थवृत्ति से सुपरिचित एवं सावधान कर्मचारी भी उसके प्रशंसक है। निश्चय ही वनरक्षा के लिए समर्पित वनरक्षिका वासु का यह प्रयास प्रेरणादायक है।

-सी-276, भाभा मार्ग, तिलकनगर, जयपुर

आयुर्वेद-स्तम्भः

# अङ्गारकर्कटी श्रेष्ठा

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**भोजने प्रयुक्तेष्वाहारद्रव्येषु संस्कारप्रधानेषु च कृतान्नेषु देशकालयोः प्रभावं साक्षाद्रूपेण वयं पश्यामः। कृतान्ननिर्माणक्रमे तु समये समय आवश्यकतानुसारं परिवर्तनं जनाः स्वभावत एव कुर्वन्ति। प्रसङ्गेऽस्मिन् विशिष्टपोषणात्मकस्य राजस्थानप्रान्ते प्रचलितस्यातीव रुचिप्रदस्य गरिष्ठस्य सुस्वाद्वात्मकस्य ''चूरमा-बाटी'' इत्याख्यस्य प्रसिद्धस्य श्रेष्ठस्य सर्वग्रहात्मकस्य ( One of Unique combination ) किञ्चिच्छास्त्रसम्मतं व्यावहारिक-मैतिहासिकं च विवरणं प्रस्तूयते।**

भोजन में प्रयुक्त होने वाले संस्कार प्रधान आहार द्रव्यों में एवं कृतान्न के भेदों में देश-काल का प्रभाव हम साक्षाद् रूप से देखते हैं। कृतान्न के निर्माण के क्रम में तो समय-समय पर आवश्यकता के अनुसार लोग स्वभाव से ही परिवर्तन करते रहते हैं। इस प्रसंग में राजस्थान प्रान्त में प्रचलित विशिष्ट पोषणात्मक अत्यंत रुचिप्रद गरिष्ठ एवं सुस्वादु ''चूरमा-बाटी'' इस नाम से प्रसिद्ध श्रेष्ठ सर्वग्रह स्वरूपका (One of Unique combination) कुछ शास्त्र सम्मत व्यावहारिक तथा ऐतिहासिक विवरण प्रस्तुत किया जा रहा है।

**राजस्थानप्रान्ते श्रेष्ठसंयोगात्मकं सर्वग्रहेऽपि प्रतिग्रहप्रधानस्वरूपात्मकं ''दाल-बाटी-चूरमा-कढी-टिपोरियाख्यहरितमरिचविनिर्मितं व्यञ्जनं-पर्पटकम् च'' भोजनमतीव प्रसिद्धं वर्तते। सामान्यतया वर्षाकालतः पूर्वं देवशयन्येकादशीतः विवाहादीनां संस्काराणामायोजनं न भवति, परिणामतः पोषणात्मकानां जिह्वालौल्यपरिशामकानां मिष्टान्ना-नामन्येषाञ्च मिष्टान्नसहयोगप्रदानां यथावश्यक-रूपेणाम्ल-लवण-कटुतिक्तकषायरसात्मकानाम् ''चाट'' इत्याख्यानां व्यञ्जनानां या सहज-सुलभता जेमनव्यसनिनां कृते भवति तत्र किञ्चित् कालपर्यन्तं विरामो सञ्जायते। अतः रूक्षे मरुप्रधाने राजस्थानप्रदेशे सर्वरससंयुक्तेषु पक्वान्नेषु व्यञ्जनेषु च या गृध्नुता व्यसनस्वरूपे जिह्वायां मनसि घ्राणे च संयुक्तरूपेण संपृक्ता संसक्ता चाभ्यासेन सञ्जाता, तस्याः परितोषार्थं आदानदुर्बलस्य शरीरस्य च पोषणार्थमुन्मुक्त-वातावरणे च घोषकरणार्थं, वर्षाकालप्रभावात् परिवर्धमानस्य वातदोषस्य चानुलोमार्थं, ओष-प्लोष-दाह-दवथुकरणे समर्थस्य वर्षासु चीयमानस्य पित्तदोषस्य द्रवस्या-वशोषणार्थं, तस्यैवोष्णगुणस्य व्याजेन गोष्ठीष्वायोजनं कुर्वन्ति राजस्थानप्रदेशस्य जनाः।**

राजस्थान प्रान्त में श्रेष्ठ संयोग स्वरूपक सर्वग्रह के रूप में होते हुए भी प्रतिग्रह प्रधान स्वरूपक ''दाल-बाटी-चूरमा-कढी-टिपोरिया-पापड़'' नाम का भोजन अत्यंत प्रसिद्ध है। सामान्यतया वर्षा काल से पूर्व देवशयनी एकादशी से विवाहादि संस्कारों का आयोजन नहीं होता है परिणामतः षोषणात्मक जिह्वा के लौल्य (लालच) का शमन करते वाले मिष्टान्न का तथा मिष्टान्न का सहयोग प्रदान करने वाले अन्य यथावश्यकरूप से अम्ल-लवण-कटु-तिक्त-कषायरसात्मक ''चाट'' इस नाम से प्रसिद्ध व्यञ्जनों की जो सहज-सुलभता जेमन के व्यसनवाले लोगों के लिए होती है, उसमें कुछ कालपर्यन्त विराम हो जाता है। अतः रूक्षस्वरूप के मरुप्रधान राजस्थान प्रदेश में सर्वरस संयुक्त पक्वान्नों में एवं व्यञ्जनों में जो गृध्नुता (लोभ) व्यसनस्वरूप में जिह्वा में, मन में एवं घ्राण में संयुक्तरूप से अभ्यास संपृक्त और संसक्त हो गई है उसके परितोष के लिये और आदानकाल के प्रभाव से दुर्बल शरीर के पोषण के लिये तथा उन्मुक्तवातावरण में घोष (प्रसन्नताद्योतक आवाज) करने के लिये एवं वर्षाकाल के प्रभाव से परिवर्धमान वातदोष का अनुलोमन करने के लिये, ओष (पास में रखी हुई अग्नि से होने वाली दाहानुभूति की तरह), प्लोष (कुछ दहन अर्थात् झुलसने की तरह पीडा), दाह (सर्वाङ्ग में जलन), दवथु (धक्-धक् कर जलना) करने में समर्थ

वर्षा में सञ्चित होते हुये पित्त दोष के द्रव के अवशोषण के लिये तथा उसके ही उष्णगुण का उपशमन करने के लिये इस षड्रसात्मक ''दाल-बाटी-चूरमा नामक जेमन का'' देव पूजन क्रम में ''सवामणी'' के रूप में प्रसाद अर्पण करने के बहाने से गोष्ठियों में (गोठों में) राजस्थान प्रदेश के लोग आयोजन करते हैं।

**यद्यपीदमृतुचर्यायां प्रोक्तस्याचार्यस्य निर्देश-स्योल्लङ्घनं वर्तते, यतो ह्याचार्यः चरकः कथयति यद् वर्षास्वग्निबलं क्षीणं भवति, अतः वर्षासु साधारणः सर्वो विधिरेव प्रशस्तः। पुनरपि रूक्षप्रदेशेऽभ्यासेन स्नेहकामाः मरुप्रदेशीयाः जनाः स्नेहसिक्तस्य गरिष्ठस्य ''चुरमा-बाटी'' इत्याख्यस्य मिष्टान्न-प्रधानस्य भोजनस्य ग्रहणं कुर्वन्त्येव।**

यद्यपि यह ऋतुचर्या में आचार्य के द्वारा दिये गये निर्देश का उल्लङ्घन है, क्योंकिं आचार्य चरक कहते हैं कि वर्षा में अग्निबल क्षीण होताहै, अतः वर्षा में सर्वसाधारण विधि का परिपालन ही श्रेष्ठ है। फिर भी रूक्षप्रदेश में अभ्यास के कारण स्नेह की इच्छा रखने वाले मरुप्रदेशीय लोग स्नेह से (घृत से) तर किये गये गरिष्ठ ''चूरमा-बाटी'' इस नाम के मिष्टान्नप्रधान भोजन को ग्रहण करते हैं।

**इतिहासदृष्टद्या चूरमातः पूर्वं ''बाटी'' इत्याख्यस्य विशिष्टस्य भोजनस्याविष्कारः जातः। संहिताग्रन्थेषु व्याख्यावाङ्मयेष्वन्येषु च संग्रहग्रन्थेषु कृतान्नप्रकरणे बहुविधानां शास्त्रसम्मतानां देशे प्रदेशे समाजे व्यवहारे च तदनुरूपाणां प्रचलितानां कृतान्नानामुल्लेखो वर्तते किन्तु न तत्र कुत्रापि ''बाटी'' इत्याख्यायाः वर्णनमुपलभ्यते। सर्वप्रथमं भावप्रकाशे ''अङ्गारकर्कटी''नाम्नाऽस्य वर्णनं वर्तते।यथा-**

**शुष्कगोधूमचूर्णं तु साम्बु गाढं विमर्दयेत्।**
**विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत्।।**
**अङ्गारकर्कटी ह्येषा बृंहणी शुक्रला लघुः।**
**दीपनी कफकृद्बल्या पीनसश्वासकासजित्।।**
**(भावप्रकाशनिघण्टु-कृतान्नवर्ग)**

इतिहास की दृष्टि से चूरमा के पहले ''बाटी'' का आविष्कार हुआ। संहिताग्रन्थों में, व्याख्यावाङ्मय में तथा अन्य संग्रह ग्रन्थों के कृतान्नप्रकरण में बहुविध, शास्त्र सम्मत, देश में, प्रदेश में और समाज में और तदनुरूप व्यवहार में प्रचलित कृतान्नों का उल्लेख है, किन्तु वहाँ पर कहीं पर भी ''बाटी'' का वर्णन नहीं होता है। सर्वप्रथम भावप्रकाश में ''अङ्गारकर्कटी'' नाम से इस का वर्णन है। यथा -

गेहूँ से बने सूखे हुए आटे को पानी के साथ गूँधकर हाथ में गोल गोल थोडे मोटे वटक (लोई) बनाकर निर्धूम अङ्गार पर डालकर उलट पलटकर धीरे-धीरे पकावे। इसे अङ्गारकर्कटी या बाटी कहते हैं। यह बाटी पुष्टिकारक वीर्यवर्धक होती है और पीनस, श्वास तथा खाँसी को नष्ट करती है।

**संहितासु यूषरूपेण प्रतिष्ठितं व्यञ्जनं सूप्या-परपर्यायेणापि ज्ञायते। एतस्य प्रयोगः स्वास्थ्य-संरक्षणक्रमे रोगावस्थायामपि च परंपरातः क्रियते। वर्तमानकाले तु विभिन्नैः संस्कारैः संस्कारितं सूप्यमिदं दालरूपेण प्रतिदिनमेव भारतीयानां भोजनस्थालीसु सुप्रतिष्ठितं वर्तते। प्रसिद्धे भक्ष्येऽ-स्मिन् सूप्यमिदमग्रिमे प्रमुखे स्थानेऽपरिहार्यरूपेण विराजितमस्ति, अतः सर्वदा ''दाल-बाटी-चूरमा'' इति संबोधनेन ख्यातमिदं सुस्वादु भोजनम्। अथवा कदाचित् मध्येऽपि प्रयुक्तं सुशोभितं भवति सूप्यमिदं, यथा- ''चूरमा-दाल-बाटी''।**

संहिताओं में यूषरूप से प्रतिष्ठित व्यञ्जन ''सूप्य'' नामक दूसरे पर्याय से भी जाना जाता है। इस यूष का प्रयोग स्वास्थ्य के संरक्षणक्रम में तथा रोगावस्था में भी परंपरागत रूप से किया जाता है। वर्तमानकाल में भी विभिन्न संस्कारों से संस्कारित यह सूप्य दालरूप से प्रतिदिन ही भारतीयों के भोजन की थालियों में सुप्रतिष्ठित है। इस प्रसिद्ध भोजन में यह सूप्य (दाल) प्राथमिक रूप से अग्रिम प्रमुख स्थान पर अपरिहार्यरूप से विराजित है, अतः सर्वदा ''दाल-बाटी-चूरमा'' इस संबोधन से यह सुस्वादु भोजन विख्यात है अथवा कदाचित् मध्य में भी प्रयुक्त यह सूप्य सुशोभित होता है, यथा- ''चूरमा-दाल-बाटी''।

**संभवतः मिष्टाभिलाषिजनैः स्नेहाभिकाङ्क्षां कुर्वद्भिश्च ''चूरमा'' इत्यस्याविष्कारणमाकस्मिक-रूपेण जातम्। इतिहासकाराः कथयन्ति यत् 713-14 इति ख्रिस्तीये वर्षे मेवाडप्रदेशे जातस्य ''बप्पा रावल'' इति नाम्ना प्रसिद्धस्य शासकस्य शासनकाले (723-753 ई.) ''बाटी'' नाम्ना प्रसिद्धस्य कृतान्नस्या-विष्कारः संयोगेन सञ्जातः। ''बप्पा रावलः'' अतीव प्रसिद्धः शूरवीरः योद्धाऽऽसीत्। विजेत्रा तेन बहवः युद्धाः कृताः। तस्य सैनिकाः यदा प्रातःकाले युद्धार्थ गच्छन्ति स्म, तदार्द्रेण समुपलब्धानामन्नानां चूर्णेन वटकान् विधाय मरुभूमौ समुपतप्ते रजस्यन्तः सन्निधाय युद्धार्थं गच्छन्ति स्म। सायंकाले ते यदा युद्धभूमितः परावर्तन्ते स्म, तदा सुपक्वानां तेषां वटकानां संग्रहणं कृत्वा दालस्वरूपेण मुद्गयूषेण सह भक्षयन्ति स्म।**

संभवतः मीठे के शौकीन तथा स्नेह (घृत-तैलादि) की इच्छा रखने वाले लोगों के द्वारा इस ''चूरमा'' का आविष्कार आकस्मिकरूप से हुआ है। इतिहासकार कहतेहैं कि सन् 713-14 इस ईस्वीय वर्ष में मेवाडप्रदेश में उत्पन्न ''बप्पा रावल'' इस नाम से प्रसिद्ध शासक के शासनकाल (734-753 ई.) में ''बाटी'' नाम से प्रसिद्ध कृतान्न का आविष्कार संयोग से ही हुआ था। ''बप्पा रावल'' अत्यन्त ही प्रसिद्ध शूरवीर योद्धा थे। उस विजेता ने अनेक लडाईयाँ लड़ी। उस के सैनिक जब प्रातःकाल युद्ध के लिये जाते थे, तब उपलब्ध अन्नों के गीले आटे से थोडे मोटे वटक बना कर मरुभूमि में समुपतप्त रेत के अन्दर दबाकर रख कर युद्ध के लिये चले जाते थे। सायंकाल में जब वे युद्धभूमि से लौटते थे तब सुपक्व उन वटको को इकट्ठा कर के दालस्वरूपक मुद्गयूष के साथ खाते थे।

**एते सुपक्वाः वटका एव तत्समाभिधानेन ''बाटी'' इति नाम्ना विख्याताः जाताः। संस्कृते तु ''अङ्गारकर्कटी'' इति नाम सम्भवतः भावमिश्रेण निर्धारितम्। अतीव स्वादिष्टा दीपनी पोषणी बुभुक्षाप्रशमनी ह्येषाऽङ्गारकर्कटी तस्मिन् समये सैनिकेष्वतिप्रसिद्धा सञ्जाता। अतः युद्धक्षेत्राद् यदा ते गृहं समागताः तदा निर्धूमेष्वङ्गारेषु सुपक्वान् तान् वटकान् भक्षयित्वा प्रचारितवन्तः। कदाचित्तु मिष्टाभिलाषिणः जनाः तान् वटकान् संचूर्ण्य घृतं शर्करां गुडं वा सम्मिश्र्य भक्षितवन्तः तदा चूर्णस्वरूपस्यास्य नाम ''चूरमा'' इति सञ्जातम्। इत्थं शनैः शनैः संस्कारप्रभावात् भक्ष्येऽस्मिन् ''चूरमा-मसालाबाटी-क्वथिता-टिपोरिया-बेसनगट्टा'' इत्यादीनां संयोगः सञ्जातः। अधुना तु मध्यप्रदेशे (विशेषेण मालवाक्षेत्रे) प्रचलितस्य मूलतः राजस्थानप्रदेशीयस्यास्य प्रसिद्धस्य भक्ष्यस्य प्रसिद्धिः न केवलं संपूर्णे भारतवर्षेऽपितु देशान्तरेष्वपि सञ्जाता।**

ये अच्छी तरह पके हुये वटक ही तत्सम सम्बोधन ''बाटी'' इस नाम से विख्यात हो गये। संस्कृत में तो ''अङ्गारकर्कटी'' यह नाम सम्भवतः भावमिश्र ने नियत किया है। अतीव स्वादिष्ट, दीपनी, पोषणी और बुभुक्षा का प्रशमन करने वाली यह अङ्गारकर्कटी (बाटी) उस समय सैनिकों में अत्यन्त प्रसिद्ध हो गई। अतः जब वे युद्धक्षेत्र से घर आ गये तब निर्धूम अङ्गारों में सुपक्व उन वटकों (बाटियों) को खा कर प्रचारित किया। कदाचित् मीठे की इच्छा रखने वाले लोगों ने उन वटकों को चूर कर (चूर्ण कर के) घृत और शर्करा या गुड मिला कर खाया तब चूर्णस्वरूप इस का नाम ''चूरमा'' यह हो गया। इस तरह उस के बाद शनैः शनैः संस्कार के प्रभाव से इस भक्ष्य में ''चूरमा-मसालाबाटी-कढी-टिपोरिया-बेसनगट्टा'' इत्यादि का संयोग हो गया। अब तो मध्यप्रदेश में (विशेष रूप से मालवा क्षेत्र में) प्रचलित लेकिन मूलतः राजस्थान प्रदेशीय इस प्रसिद्ध भक्ष्य की प्रसिद्धि न केवल संपूर्ण भारत वर्ष में अपितु दूसरे देशों में भी हो गई।

**इङ्ग्लैण्डदेशे ये भारतवासिनः राजस्थानीयाः सन्ति तैः गोष्ठीषु ''चूरमा-बाटी'' इत्यस्य प्रचारः सम्यक् रूपेण कृतः। 2019 तमस्य वर्षस्य जूनमासस्य 23 तमे दिनांके लन्दननामकस्य महानगरस्य समीपे केवलं 17 कि.मी. दूरे संस्थिते हेरो (Harrow a large suburban town in Greater London) नामक उपनगरे एकं बृहदायोजनं राजस्थानवासिभिः कृतम्, तस्मिन् ''चूरमा-दाल-बाटी'' इत्याख्यस्य प्रसिद्धस्य**

**संयोगात्मकस्य भोजनस्य व्यवस्था विहिता। इङ्ग्लैण्डेदशस्य भिन्न-भिन्न-नगरेषु ये मूलतः राजस्थानवासिनः निवसन्ति त उत्सवमिमं विशिष्टं मन्यमाना आयोजनेऽस्मिन्नुल्लासपूर्वकं सम्मिलिता अभवन्। समये समये विशिष्टमेता-दृग्विधसमायोजनं कुर्वाणास्ते ''चूरमा-दाल-बाटी'' इत्यस्य सुस्वादु-तायाः नैरन्तर्यं जिह्वासु प्रतिष्ठापयन्ति।**

इङ्ग्लैण्डदेश (Harrow a large suburban town in Greater London) में जो भारतवासी मूलतः राजस्थानी हैं, उनके द्वारा गोष्ठियों में ''चूरमा-बाटी'' का प्रचार सम्यक् रूप से किया गया है। 23 जून 2019 को लन्दन नामक महानगर के समीप में केवल 17 कि.मी. दूर स्थिते हेरो (Harrow) नामक उपनगर में राजस्थान-वासियों के द्वारा एक बृहदायोजन किया गया, उसमें ''चूरमा-दाल-बाटी'' नाम के प्रसिद्ध संयोगात्मक भोजन की व्यवस्था की गई। इङ्ग्लैण्डदेश के भिन्न-भिन्न-नगरों में जो मूलतः राजस्थानवासी रहते हैं, इस उत्सव को विशिष्ट मानते हुये वे लोग इस आयोजन में उल्लासपूर्वक सम्मिलित हुये। समय-समय पर इस तरह के विशिष्ट आयोजन करने वाले वे लोग ''चूरमा-दाल-बाटी'' की सुस्वादुता को (लोगों की) जिह्वाओं पर प्रतिष्ठापित करते हैं।

**भारतवर्षस्य विभिन्नेषु प्रान्तेषु भक्ष्यस्यास्य प्रचलनमधुना वर्तते। ओदनेन सह बिहारप्रान्ते बाटीः भुञ्जानाः जनाः भक्ष्यमिमं ''लिटी-चोखा'' इत्य-भिधानेन संबोधयन्ति। महाराष्ट्रप्रान्ते तु ''गाकर'' इति नाम्ना बाटीसदृश एव भक्ष्यः प्रचलितो वर्तते। किन्तु 'गाकर' इत्यस्याकृतिस्तु वर्तुलाकारा न भवत्यपितु चतुष्कोणात्मिका भवति, निर्माणप्रक्रिया तु तत्समैव भवति। स्वादेऽपि भिन्नता नानुभूयते किन्त्वनया सह ''दाल'' इत्यस्य प्रयोगं कदाचित् तु कुर्वन्ति पुनरपि प्रायः दुग्धं समिश्र्याऽस्योपयोगं कुर्वन्ति जनाः।**

इस समय भारतवर्ष के विभिन्न प्रान्तों में इस भोजन का प्रचलन है। बिहार प्रान्त में भात के साथ बाटियों को खाने वाले लागे इस भोजन को ''लिटी-चोखा'' के नाम से संबोधित करते हैं। महाराष्ट्रप्रान्त में तो ''गाकर'' इस नाम से बाटी जैसा ही भक्ष्य प्रचलित है। किन्तु ''गाकर'' की आकृति तो गोल नहीं होती अपितु चतुष्कोण वाली होती है, किन्तु निर्माण प्रक्रिया तो उसके समान ही होती है। स्वाद में भी भिन्नता की अनुभूति नहीं होती, किन्तु इस के साथ सह ''दाल'' का प्रयोग कभी कभी तो करते हैं, फिर भी लोग प्रायः दूध मिलाकर इस का उपयोग करते हैं।

**देशस्यास्य मध्यप्रदेशप्रान्ते मालवाक्षेत्रेऽपि चूरमा-बाटी इत्यस्य प्रचलनं वर्तते। विशेषेण तूज्जयिन्यां, रतलामनगरे, इन्दौरनगरे, खण्डवानगरे, इटारसीनगरे चास्य प्रचलनं वर्तते। इटारसीनगरे तु नर्मदायाः तटे प्रतिवर्षं मेलकमेकं कार्तिकमासस्य पूर्णिमायामायो-जितं भवति। तस्य मेलकस्य नाम ''बान्द्राभानमेल-कम्'' इत्यस्ति। तत्र भिन्नभिन्नसमाजपुरुषाः पृथक्-पृथक् रूपेण स्नेहमिलनसमारोहाणामायोजनं कुर्वन्ति। तेष्वावश्यकरूपेण ''चूरमा-दाल-बाटी'' इत्यस्य श्रेष्ठस्य भक्ष्यस्य व्यवस्थां कुर्वन्ति तथा स्नेहमिलनक्रम एव युवकयुवतीनां परिचयसम्मेलनानामायोजनम् कुर्वन्ति। विवाहसम्बन्धानां नियततां कुर्वाणाः जनाः परमानन्दमनुभवन्ति।**

इस देश के मध्यप्रदेश प्रान्त में मालवाक्षेत्र में भी चूरमा-बाटी का प्रचलन है। विशेष रूप से तो उज्जयिनी में, रतलाम में, इन्दौर में, खण्डवा में और इटारसी में इस का प्रचलन है। इटारसी में तो नर्मदा के तट पर प्रतिवर्ष एक मेला कार्तिक मास की पूर्णिमा पर आयोजित होता है। उस मेले का नाम ''बान्द्राभान मेला'' है। तत्र भिन्न-भिन्न समाज के लोग पृथक्-पृथक् रूप से स्नेह मिलन समारोहों का आयोजन करते हैं। उन में आवश्यक रूप से ''चूरमा-दाल-बाटी'' नामक श्रेष्ठ भोजन की व्यवस्था करते हैं तथा स्नेह मिलन क्रम में ही युवक युवतियों के परिचय सम्मेलनों का भी आयोजन करते है। विवाह सम्बन्धों को नियत (तय) करते हुये लोग परम आनन्द का अनुभव करते हैं।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य ● ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,